Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७३८

Title ग्रहयज्ञ पद्धतिः

Author ब्रह्म भूषणः ब्रजभूषणापराभिधः

Extent ६८ पत्राणि Age ×

Subject सूत्र पद्धतिः

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रहयज्ञ पद्धति

४७३८

ग्रहयज्ञविधिः कलाधरी पद्धति

श्लो २५००



© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रीगणेशाय नमः ॐ अथ ग्रहयज्ञविधानं ॐ विघ्नं विघ्नेश्वरं नत्वा सर्वकृत्यप्रसंस्थितम्
कात्यायनमते वक्ष्ये ग्रहयज्ञं समासतः ॥१॥ तत्र तावद्ग्रहयज्ञो नाम पूजनहवनादिभिर्ग्रहाणां प्री
णनं यतस्सर्वाः ग्रहाधीना नरेंद्राणां मुच्छ्रायाः पतनानि च भावाभावौ च जगतस्तस्मात्पूज्य
तमा ग्रहा इति स च ग्रहयज्ञस्त्रिविधः तदुक्तं मात्स्ये ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोवि
दैः प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परं तृतीयः कोटिहोमः स्यात्सर्वकामफलप्रद इति स च पु
नस्त्रिविधः नित्यनैमित्तिककाम्यभेदात् तत्रायनविषुवोपरागादिषु नित्यः गर्भाधानादिका
र्मसु नैमित्तिकः विपदुपगमसंपदादिकामनादिषु काम्यः मात्स्ये अयनद्वये चोपरागे विषुवा
दिषु संक्रमे ग्रहपूजामकुर्वाणो यके गोविवसीदति यद्वा विघ्नादिवन्नित्यपूजनं नित्यम् अला
णां विघ्नमीशं च गणेशार्कमित्युपक्रम्य गौरीं वा नित्यमर्चयेदित्युपसंहारात् नैमित्तिकं पारि
जाते कार्यारंभेषु सर्वेषु प्रतिष्ठास्वध्वरेषु च नववेश्मप्रवेशे च गर्भाधानादिकर्मसु ॥१॥ आरोग्य
स्नानसमये संक्रांतौ रोगसंभवे अभिचारेष्वयः कुर्यात् ग्रहपूजाविधानतः सोऽभीष्टं फलमाप्नो
ति निर्विघ्नेन न संशय इति फलाभिसंधिग्रहार्चनं काम्यं तत्रैव श्रीकामः शांतिकामो वा ग्रह
यज्ञं समाचरेत् वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपीति अत्र विशेषतो मूलवाक्यात्क

© Dharmartha Trust J&K. Digitized by eGangotri

रतोज्ञेयानि ग्रंथविस्तरभयान्नलिखितानि अथ सामान्यतो ग्रहयुद्धनिमित्तमभिधीयते ।
स्मात् देवदानवगंधर्वयक्षराक्षसकिन्नराः पीड्यंते ग्रहपीडाभिः किंपुनर्भुविमानवाः शनैश्च
रेणसौदासोनरमांसेनियोजितः राहुणापीडितोराजा नलोभ्रांतोनहीतले अंगारकविरोधेन
रामोराष्ट्राद्विवासितः अष्टमेनशशांकेन हिरण्यकशिपुर्हतः रविणासप्तमस्थेनरावणोविनि
पातितः गुरुणाजन्मनस्थेनहतोनामसुयोधनः षोडवाद्वयधपीडयायोविकर्मणिनियोजिताः
षष्ठेनोशनसाप्युक्तेहिरण्याक्षोनिपातितः इति तत्रैव यत्रमासेरविवाराजायंतेपंचसंततं दु।
र्भिक्षंराजभंगश्चमहामार्यादिकंभयं यत्रमासेमंगलस्यजायंतेपंचवासराः रक्तेनपूरितापृ।
थ्वीछत्रभंगश्चजायते यत्रमासेपंचवाराःजायंतेबृहस्पतेः विग्रहःपश्चिमेदेशेवेश्मयुद्धंप्रजा
यते शनैश्चपंचकंदृष्टाशानालेकंपतेफणी ईशानेदेशभंगश्चवह्निदाहोमहद्भवेतिति शेषवार
पंचकंशुभं यामले दुर्भिक्षादिभयंचैवचक्रग्रहसमन्वये तथारोगभयंराष्ट्रेनृपाणांहिविनाश
ने पंचग्रहसमायोगेदुर्भिक्षंशोकरादिकं नृपवैरंगर्भनाशोजायतेजननाशनं ग्रहषट्कसमा
योगेमत्रिणांमरणंभवेत् पशुस्वादिभयंसर्वंसंकरादिजनक्षयः प्रहराज्ञोविनाशोवामहा
भयमथापिवा-सप्तग्रहसमायोगेत्रिलोकमरणंभवेत् जगत्प्रलयमेवापितदानिर्मांत्रमेवज
गत् ग्रंथांतरे यद्येकस्मिन्नाशौयदिभवतिषट्संतानिवसंति[illegible]गोलायोगः मलयपदसिंधो।

श

ग्र॰
य॰
२

लभते रूपाणां नाशः स्यात्कुलतिवस्तथा श्रूयति महीभवेल्लोको रंकः परिहरति पुत्रं च जननी १ ज्यो
तिर्निर्बंधे अतऊर्ध्वं महेश्मितानामाङ्कः खे महाजले सर्वं संश्रयति विक्लिः स्यात्तदा योगो महाभुजः
विनावेदेण योगो यज्ञगत्सलयकारका तद्दृत्तजातजंतूनां महारोगो महाभयं अर्थनाशः स्या
न्नाशो मानहानिश्च पीडनम् वातपित्तादिसंभूत महापीडा महद्भयं समयोगाद्ग्रहाणां दोषा
न्कुर्वंति सर्वदा षण्मासाभ्यंतरे वापि आयुर्हानिः प्रियस्तथा जन्माष्टद्वादशे राशौ चतुर्थे पंचमे
पि वा सर्वानिष्टफलमेवात्र नात्र कार्या विचारणा एते चान्ये च बहवो ग्रहदोषाः प्रकीर्तिता तत्तदो
षसारेण ग्रहयज्ञं समाचरेत् स्वशक्तितश्च कर्तव्यो विघ्नशांत्यै विवर्जयेदिति अत एवायुतल
क्षकोटिरूपग्रहयज्ञस्य व्यवस्था स्वशक्त्या कल्पनीया यावदसति इच्छायज्ञः स उच्यत इति अथ वि
शेषतो लक्षहोमात्मकग्रहयज्ञनिमित्तान्युक्तानि देवीपुराणे लक्षहोमं प्रवक्ष्यामि यथा प्रोक्तं
तु शंभुना भूमिकंपे दिशां दाहे ग्रहयुद्धे उपस्थिते केतुसंदर्शने चैव ब्रह्मादित्यस्य च कंपने क्रूसवर्णे
तथा सूर्ये तथा च्छिद्रसमन्विते रक्तवृष्टिस्तथा नद्यो विपरीता वहंति च निर्गते गगनाद्धूमे बारिम
घे च प्रस्थिते उपसर्गास्तथा लोके भवंति भयकारकाः यस्य राशौ ग्रहाः पंच अष्टमस्थमहत्तराधिप ग्र
हाणां सर्वे वेदस्य ग्रहे देवी हृष्टमसंस्थिते तथा कंपनं स्वेदनं गात्रे प्रतुना पार्श्वचालनं देवतानां तथाध्य
तथ्यानानाद्भयकारकाः लक्षहोमं प्रकुर्वीत तत्र दोषप्रशांतये इति अथ कोटिहोमनिमित्तानि म।

२

© Dharmartha Trust J&K. Digitized by eGangotri

विषोत्मेर संवरण उवाच भगवन्महदुत्पात संभवे भूमिकंपने निर्घाते पांशुवर्षे च ग्रहमेघे तथै

व च जन्मनक्षत्रपीडासु दुर्भिक्षे राष्ट्रविग्रहे व्याधीनां संभवे जाते शरीरे चातिपीडिते क्लेशे महति

ति वा मय्ये किं कर्तव्यं नरोत्तमैः स्वर्गस्य साधने यस्य कीर्त्तिर्द्धनदं शुभम् यद् ब्रूहि त्वं द्विजश्रेष्ठ न।

यारोग्यप्रदं त्वत्तामिति सनत्कुमार उवाच शृणु राजन् प्रवक्ष्यामि ग्रहयज्ञमनुत्तमं कोटिहोमा

ख्यमतुलं सर्वकामफलप्रदम् ब्रह्महत्यादिपापानि येन नश्यन्ति तत्क्षणात् उत्पाताः प्रशमं यान्ति

महत्संपद्यते सदैव अश्वमेधसहस्राणि दशवाजपेय च धर्मवित् कृत्वा यत्फलमाप्नोति कोटिहो।

मान तस्माते: ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानि च नश्यन्ति कोटिहोमेन यथा वरवभाषितं।

अथ प्रवक्ष्यात कोटिहोमः संवरण उवाच बहुत्वात्कर्मणो ब्रह्मन् कोटिहोमः सुदुष्करः का।

लेन महता चैव कर्तुं शक्यः कथंचन नियमाश्च ब्रह्मचर्याद्या दुष्करा इति मे मतिः निरोधो ब्राह्मणा

नां च भूम्यादि सुदुष्करः कार्याणामल्पवीर्यत्वात्सर्वकालायपेत्तथा यत्नादितायलैब्रह्मन्सर्व

शास्त्रेषु प्रपद्यते कोटिहोमस्य संक्षेपं वद मे ब्रह्मसंभव सनत्कुमार उवाच शतानन्तोदशमुखो

दिमुवैकमुखस्तथा चतुर्मुखो महाराजन् कोटिहोमो विधीयते कार्थ्यप्यगृहतां ज्ञात्वा नैक

हस्तमुखपर्वणः यथा संक्षेपतः कार्यः कोटिहोमस्तथा मुण कृत्वा कुंडशतं दिक्षु यथोक्तमान

संमितं एकैकस्मिंस्तथा कुंडे दशविप्रांस्तु योजयेत् सद्यः फलं तद्विप्राणां महत्संपरिकीर्तितम्

© Dharmartha Trust J&K. Digitized by eGangotri

एकस्थानप्रणीतेग्नौ सर्वतः परिभाविते होमं कुर्युर्द्विजाः सर्वे कुण्डे कुण्डे यथोदितं यथा कुण्डं बहुत्वेपि वा।
जस्यैषो महाकृतौ तथाप्यग्निबहुत्वं स्यान्न च यत्नो विधीयते तथा कुण्डे शतच्छत्रहुतार्चिष्मति योजिते
एकएवभवेद्यत्नः कोटिहोमेन संशयः एवं यः क्रियते लिंगव्याकुलः कार्यगौरवात् शतानन्तः सवि
तेयः कोटिहोमेन संशयः स्वल्पैर्होमैः कार्यः सः दीर्घकालादिकेपि वा तदा दशसहस्रैः कार्यः को
टिहोमः शुभो मतः विप्राणां द्विशतेनात्र प्रविभज्य नियोजयेत् तेपि विज्ञातशीलाः स्युर्हितवृत्ता जिते
न्द्रियाः यत्कुण्डद्वयं कृत्वा विभज्य च विभावसुं होमं कुर्युर्द्विजा भूयः संस्कृतं विधिपूर्वकं शतं तत्र।
नियोजयेद्विप्राणां प्रविभज्य वै मासे यद्वार्धमासे वा कार्यं काले ह्युपस्थिते तदापि द्विसहस्रैः का
र्यः कोटिहोमो विचक्षणैः तदान्तसेव्यायत्नं यजमानः समापयेत् कालेन बहुधा राजन् सदा।
वैकस्तु वा भवेत् एककुण्डे स्थितो वह्निरेकचित्तैः समाहितैः यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विच।
क्षणैः न संख्यानियमस्त्वत्र ब्राह्मणानां नरोत्तम न कालनियमश्चैव स्वेच्छया यत्नः स उच्यते ग्राह
मा कर्तुं कामस्य वा तन्मासादिकमेव तत् तथाप्यशक्तः कर्तव्यो यज्ञो यः सर्वकामिकः प्राप्य मेकस्तु।
त्वो राजन् कालेन बहुना भवेत् बहुविघ्नश्च कालो वै तस्मात् संक्षेपमाचरेत् यतो वै विघ्नमाप्नुयाच्चि।
तैर्वा स्थिरैः सदा अतः संक्षेपतः कार्यं धर्मकार्यं प्रशस्यते ततः समाप्य यज्ञं तु कारयेत्तु महोत्सवं शं
खतूर्यनिनादेन ब्रह्मघोषरवेण च ततस्तु तर्पयेद्विप्रानृत्विजः श्रद्धयान्वितः एकैकं कंकणांश्च व ३

© Dharmartha Trust J&K. Digitized by eGangotri

गुडैर्विविधैर्धूप गोमशान्तैर्वेदवितं मुख्यानां च शान्तेन तथा महत्त्वेन तु वर्णांस्तु सर्वेषामपि दाप
येत् ग्रामैर्गजैरथैरश्वैः पूजयेच्च पुरोहितं हीनादक्षिणान्सर्वान्न्स्थानेष्वपि पूजयेत् ततश्चाय
भूषयेत्स्नानैस्तैर्वेदैः पूर्वकल्पितैः लक्षहोमोक्तमन्त्रेण महाविजयकारिणा एवं समाप्ये यस्तु को
टिहोममसविघ्नं तस्यारोग्यमिषाप्त्राश्च आयुर्वृद्धिस्तथैव च सर्वपापक्षयश्चैव जायते नात्र संशय
अनावृष्टिभयं चैव दुर्भिक्षभयमेव च दुर्भिक्षभयपीडाश्च प्रशमं यान्ति भूतले एतत्पुण्यं पापहरं
सर्वकामफलप्रदं सनत्कुमारमुनिना पार्थिवाय निवेदितं सर्वोपसर्गशमनं त्वघनाशनं
वैयेकारयन्ति मनुजा लक्ष्यकोटिहोमं भोगानवाप्य मनसोभिमतान्स्वकामं ते यान्ति शक्रभवने
भुवि शुद्धसत्त्वाः इति स्कन्दपोद्धात अथ ग्रहाः याज्ञवल्क्यः सूर्यः सोमो महीपुत्रः सोमपुत्रो बृ
हस्पतिः शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः इति एषां मन्त्राः स्कांदे आकृष्णेति सहस्रा
शीरिमं देवा तेयेदेव अग्निर्मूर्द्धेति भौमाय उद्बुध्यस्वेति बुधाय च बृहस्पतेति च गुरोः शुक्रायान्ना
त्परिस्रुतः शनैश्चरस्य मन्त्रो यं शन्नो देवीरितीरितः कयान इति राहोश्च केतोः कृण्वन्नकेतवः इ
तिग्रहाणां देवतानामुक्तं विष्णुधर्मोत्तरे अतः यस्य स्वामि यो देवो यो ग्रहः स्मृतः अग्निरर्कः
स्मृतः सोमो वरुणः परिकीर्तितः अङ्गारकः कुमारस्तु बुधस्य भगवान्हरिः बृहस्पतेः स्मृतः
शक्रः शुक्रो देवी च पार्वती प्रजापतिः शनैश्चस्य राहोर्योगणाधिपः विश्वकर्मा स्मृतः केतोर्ये।

© Dharmartha Trust J&K. Digitized by eGangotri


ग्रहास्तेस्तु राः स्मृताः इति अनयैवाज्ञया ग्रारिलिंगकामेश्वानिमुक्ताः तथा च सूर्यादिस्थापनार्थं
स्कांदे अग्निं हंतं निर्देशाय सोमाय याश्चैतं इत्यपि स्योनापृथिवीति भौमाय यद्देवि स्तुवेधाय च ।
इदम्रायसारस्यासोराय शुक्रज्योतिः स्मिताय च प्रजापतेति सोमाय श्रायगोरितिराहव केतवे वल्ल
यत्तानेत्येवं मंत्रैः प्रतिष्ठिताः तथैव देवता ईश्वरं भास्करे विधाद्धुमां विधायालिंशाकरे स्कंदं मंग
लके विधायात्र धनाराय पण्डितः यत्रौ वेदनिधिं विधाय कुवेशको विधीयते यानेश्वरे यमं विधाय
हकालस्तथैव च चित्रगुप्ताधिपः केतोरिमिता ग्रहदेवताः वेदनिधिं विलेति तत्रैव अतः स्थाप
नमंत्रा अष्टकथया प्यनुपूर्वशः ईश्वरं स्यव केचेति श्रीपतश्च तिपावंती लक्ष्मीगौर्योरेकरूपत्वात् ।
लक्ष्मीर्गौरी हि जानमतिवैष्णवो के लक्ष्मीपदस्य गौरीलिंगात् गौरीपूजने पिस्त्रीश्वेति स्पष्टं का ।
शीविद्वविवरणप्रथमाख्याये उक्तमिति यदक्रंदति च स्कंदं विस्तुविलोरराउति श्रावल्लमिति
वल्लाणं सजोषं इति वा सदं यमाय त्वेति यमं कालं कार्ष्णिरसीति च चित्रावसवितिमंत्रेणाचित्रगु ।
सं निधापयेत् अग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री प्रजापतिः सूर्यो ब्रह्मा क्रमेणैवाभिहितमस्याधिदेवते
ति ईश्वरादीनां देवताप्रत्यक्षमादीनामधिदेवताश्च ईश्वरादीनामधिदेवतात्व ग्न्यादीनां प्रत्य ।
धिदेवतांतं बोध्यमिति विनायकस्तथा दुर्गा वायुराकाशमश्विनौ इति पंचलोकपाला इति द्वा
त्रिंशत् इंद्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् कुबेर ईशाः पतयः पूर्वादीनां दिशां क्रमात् ब्रह्मा

© Dharmartha Trust J&K. Digitized by eGangotri

अनेनस्थितिर्दिगधीशाः एषां मंत्राश्च मद्देवतास्तन्मंत्राश्चाग्रे वक्ष्यते ॥ श्री॥ अथ स्थापनार्थे निर्णयः
श्लाघ्यलाघवः रूपवर्णायुधस्थानमंडलासनवाहनात् सप्तमितूर्ध्वे ग्रहाणां च स्वरूपाकृतीरपि
गायत्रीमूलमंत्रांश्च वेदमंत्रांश्च केवलान् अधिप्रत्यधिदेवानां मंत्रांश्चण्यादिसंयुतान् तत्तन्मंत्रा
अजानानो यो ह्यनूर्ध्वं नवग्रहान् अन्तालेपनमानि ष्टातफलं नैव विंदति दुःखं चाप्नोति सुमहा
घन्यादिह्यामुत्र विभुमानिति तथा च स्कांदे जन्मभूर्गोत्रमग्निश्च वर्णः स्थानमुखानि च यो ज्ञात्वा
कुरुते शांतिं ग्रहास्तेन त्ववमानिता इति ॥ अथ ग्रहाणां रूपाण्याह तत्रैव मात्स्ये पद्मासनः पद्मक
रः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः १ श्वेतः श्वेताम्बरधरो दशाश्वः श्वे
तभूषणः गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी २ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः
चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ३ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः खड्गचर्मग
दापाणिः सिंहस्थो वरदो बुधः ४ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ दंडिनौ वरदौ कार्यौ साक्ष
सूत्रकमंडलू ५ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः बाणबाणासनधरः कर्तव्योर्कसुतः सदा
करालवदनः खड्गचर्मशूलीवरप्रदः नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ७ धूम्रा द्विबाहवः
सर्वे गदिनो विकृताननाः गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ८ सर्वे किरीटिनः कार्या ग्रहा॥
लोकहितावहाः अंगुलेनोच्छ्रिताः कार्याः शतमष्टोत्तरं सदेति इति नवग्रहमूर्तिरूपायुधवा॥

© Dharmartha Trust J&K. Digitized by eGangotri

हनानि अथस्थापनप्रकारमाह लिखिदष्टदलंपद्मंवेदिकोपरितंदुलैः आदित्यादिग्रहाणांच प्रति।
माकल्पयेत्ततः ताम्रेणाकारयेत्सूर्यं स्फटिकेननिशाकरम् कुजंतुचंदनेनतु सुवर्णेनगुरुंतथा।



तथैवतुबुधवद्दित्यर्थः रजतेनसितंसौरिंलोहेनचविधुंतु।
दं सीसेनशुक्रकांस्येनकेतूनूर्णान्यपत्ततः यथारूपवि
धमाणेनप्रतिमाकल्पयेत्सुधीरिति अथशाकेस्तुसुवर्णा।
मूर्त्तयःकार्या सुवर्णेनसमाकार्या यजमानेनमूर्त्तयइति
वचनात् मूर्तिमानंचकोटेपलेनवानदर्द्धेनतदर्द्धार्द्धेन।
वाप्रनः सुवर्णमूर्त्तिःकुर्वीतकार्यंगौरवलाघवातिहृत्वाद्वि।
ग्रंनायवंदतिमाषमाषाद्धयैःपोडशभिस्तुकर्षं कर्षैसुत
भिस्तुपलामितिलीलावत्यां मानमुक्तम् अथग्रहमंडला।
माह वसिष्ठः वृत्तमंडलमादित्येचतुरस्रंनिशाकरे त्रि
कोणंचकुजेज्ञेयंबुधेबाणसन्निभम् गुरौतुपट्टिशाकारंपंचकोणंचभार्गवे धनुर्निभंशनैर्ज्ञे
यंसूर्पाकारंतुराहवे केतूनांचध्वजाकारंग्रंमंडलंपरिकल्पयेत् अथविवाहादौविशेषमाह।
कात्यायनः आदौगणपतिंनत्वाविघ्ननाशंविनायकम् ततश्चदेवजननीग्रहस्थापनमारभेत्

© Dharmartha Trust J&K. Digitized by eGangotri

रामोदसीतै
स्तंभेष्वदलं
वंदेहंवर्त्त
कारम्
सोमैमर्त्त
वुधेपत्रमाका
इं गुरौपमाका
भृगौरत्नरवं ८
शनैखङ्गकारे
राहोमत्स्याका
केतोमत्स्याका।

श्रीहैगणपतिनवेति नमस्कारांतस्य्जोपलक्षक
म् स्पष्टीन्ब्राह्मणान् इदंचस्वस्तिवाचनोपलक्षकं
सप्तज्ञगंधमा
ल्यैर्ब्राह्मणा
न्स्वस्तिवाचा
येदितिवास
ववनात् व
कारोऽत्रमा।
समुद्दीपक
स्तेनवरुणेणकारवारसुप्रजनैसमदायोत्रसोधात् देवज
ननीरितिषोडशमातृपूज्योपलक्षकमिति तदनंतरं ग्रहस्थापनार्थंतिलकमंडलंप्रसादयति।
मंडलंचततः कृत्वा सर्वतोभद्रमेवचेति सर्वतोभद्रंचतुरस्रमित्यर्थः प्रमाणे हस्तमात्रंद्विहस्तं
वाविहस्तंवाघनारद चतुरस्रांसमांभूमिंगोमयेनानुलेपयेत् रेखामाध्यउदीचश्चचतुरस्राः।
लघासमाः नवकोष्ठेषुप्रमादीन्विमसेत्सेतंदुलैरिति तंदुलैस्तंदुलहस्त्योनेत्यर्थः इदंचवेषां

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
घं॰
८

6

लेख्यं वसिष्ठः ॐ ईशानभागे ग्रहवेदीं प्रकल्पयेत् हस्तोन्नतां हस्तविस्तीर्णां चतुरस्रां समेतन इति
ॐ उपरि स्थण्डिले पल्लवकं ॐ इत्याद्यादिलिपि वेसावाद्येणोभयोस्तुल्यत्वेन विधानात् कात्यायनः
व्रतोपनयने हैव यज्ञे शांतिकृदाहृता विवाहादौ लिखेन्निर्मितिलकं नाम मंडलम् द्वादशांगुलम
ध्यस्थं वर्तुलाष्टदलं रविं वह्नौ मंडले लिखेन्नसाग्नेय्यां चतुर्विंशति त्रिकूटं भूसुतं तैव वदंति गणं चतुरं।
गुलं धनुषाकारेण चांगुलमीशाने च बुधं तथा उत्तरे च गुरुं स्थाप्य पद्माकारेण चांगुलं पूर्वे संस्था
प्य तं शुक्रं पंचकोणेन चांगुलं खड्गाकारेण चांगुलं प्रतीच्यां शनिमेव च राहुं संस्थाप्य नैर्ऋत्यां सम।
स्पाकारेण चांगुलम् राहुवत् स्थापयेत् केतुं वायव्यां दिशि मेव च स्वां स्वां दिशं ग्रहान् स्थाप्य रेखाभि
र्वेष्टयेत्कृत्वम् भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ सोमपुत्रो गुरुश्चैव उभौ हरितपीतकौ
कृष्णवर्णो भवेत्सौरी राहुकेतू च धूम्रकौ ब्रह्माविष्णुश्च रुद्रश्च उत्तरे च तथानलः इंद्रादीन् स्थापये
त्सर्वान् स्वस्वकालाद्वदंति ये ईशानां कलशं स्थाप्य गौर्यादीश्च सर्वशः सर्वथा इति सर्वाणि समर्घः।
मात्रैवं उत्तरे स्थाप्य शामं योगिनीर्यसेत् कनिष्ठकाप्रमाणेन रेखा वार्याः प्रयत्नतः स्थूला सूक्ष्मा
न कर्तव्या यदीच्छेद्भूयसीं मनः प्रति ग्रंथं ज्योतिर्विवाहपद्धतिविवरणे इष्टम् उपयोगात् मात्स्ये ग्र
हशांति प्रकरणे कलावेपामावाहयेत्सुरान् देवानां नवसंख्यानां विंशतिर्द्वे दशाधिका इति ब्रह्मा मुरा।
रिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शांतिकरा। ८

© Dharmartha Trust J&K. Digitized by eGangotri

भवेत् ॥ अथाधिदेवताप्रत्यधिदेवतालक्षणानि विष्णुधर्मोत्तरे ॥ पंचवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोच
ने कपालशूलखट्वांगी चंद्रमौलिः सदाशिवः १ अक्षसूत्रं च कमलं दर्पणं च कमंडलुं उमा विभ
र्ति हस्तेषु पूजिता त्रिदशैरपि २ कुमारः षण्मुखः कार्यः षडंगकविभूषणः रक्तांबरधरो देवो ।
मयूरवरवाहनः ३ कुक्कुटं च तथा घंटां तस्य दक्षिणहस्तयोः पताकां वैजयंतीं स्याच्छक्तिः कार्या
च वामयोः ४ विष्णुः कौमोदकीपद्मशंखचक्रधरः क्रमात् प्रदक्षिणादक्षिणाधःकरादारभ्य नि
त्यशः पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्भुजः अक्षमालां स्रुवं बिभ्रत्स्तकं च कमंडलुं ६ च
तुर्दंतगजारूढो वज्रांकुशशूलभृत्करः शचीपतिश्च कर्तव्यो नानाभरणभूषितः ७ शचीपतिरिंद्रः
ईषन्नीलो यमः कार्यो दंडहस्तो विजानता रक्तकाशाहस्तश्च महामहिषवाहनः ८ कालः करा
लवदनो नीलांगश्च विभीषणः पाशहस्तो दंडहस्तः कार्योऽहिश्चिकरो भवान् ९ अपोऽप्येवं स्वा
कारं द्विभुजे सौम्यदर्शने दक्षिणे लेखनी विद्याम्नेवामे तु पत्रकं १० इत्यधिदेवता पिंगलश्मश्रु
केशान्तः पीतांगजठरोहणः साक्षसूः शालहस्तोऽग्निः सप्तार्चिः शक्तिधारकः ११ विक्लिं तं वामवे
णास्यकररसमन्वकल्पयेत् आपस्त्रीरूपधारिण्यः श्वेतामकरवाहनाः १२ दधानाः पद्मकलशौ
शुक्लाभरणभूषिताः शुक्लवर्णा मही कार्या दिव्याभरणभूषिता १३ चतुर्भुजा सौम्यवपुश्चक्रं ।
शुभदर्शना वरा रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम् १४ पद्मकरे च कर्तव्यं प्रणयाद्वनन्दन ।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰ प॰ ७

द्वि॰ नासौ गणानां वतर्णोसौ कार्यो एष्टगतस्तथा विश्लोविंदु स्वतवर्वौके वामे शृगाआः करेकार्योसौ
म्यासंतानमंजरी वरदाभयदिना कार्यो द्विभुजा गतथा शची १६ यज्ञोपवीती हंसस्थपकवक्रस्त्र
न्द्रभुजः अक्षसूत्रं स्रुवं विभ्रत्कुंडिकां च प्रजापतिः १७ अक्षं अक्षमालां कुंडिकां कमंडलुः अक्षा
स्त्रधराः सर्वाः कुंडिकाद्युक्तभूषणाः एकभोगा द्विभोगा वा सर्वे कार्या विभीषणाः १८ अक्षल
क्षणसूत्रके वल्कलक्षणोर्ध्वसूत्रके ग्रहाणां दक्षिणे पार्श्वे स्थापयेदधिदेवताः १९ ग्रहाणामुत्तरे
पार्श्वे समस्तप्रत्यधिदेवताः २० इति प्रत्यधिदेवताः अथ विनायकादिलक्षणानि चतुर्भुजस्त्रिने
त्रश्चैकदंतो गजाननः नागयज्ञोपवीती च पाशांकुशधरोऽभवः २१ दंतं दंतं करे दद्याद् द्वितीये
चाक्षसूत्रकं तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा २२ शक्तिं वाणं तथा शूलं खड्गं चक्रं च दक्षिणे
चंद्रबिंबमथो यामे खेटं मुद्गरं कपालकं घंटकं च विधाणामिहाहूफान द्विभुजा एषा देवी स
मुद्दिष्टा दुर्गा दुर्गार्तिहारिणी धावद्धरणपृष्ठस्था ध्वजधारी समीरणः वरदानकरो धूम्रवर्णः का
र्यो विजानता नीलोत्पलाभं गगनं तद्वर्णं स्वरथापि च चंद्रार्कद्वलंकृतं च द्विभुजं सोम्य वेदवृत्त
द्विभुजौ देवभिषजौ कर्तव्यौ रूपसंस्थितौ तयोर्गेषभयः कार्यो दिव्यादक्षिणहस्तयोः वामयोः
पुस्तकौ कार्यौ दर्शनीयौ तथा द्विजाः एकस्य दक्षिणे पार्श्वे वामे वामस्य यादव नारीयुगं प्रकर्त
व्यं त्याःसंकाशदर्शनं रत्नभांडकरे कार्यं वंदमुक्ताश्चैवं तथा इति विनायकादिरूपाणि अ

© Dharmartha Trust J&K. Digitized by eGangotri

यलोकपालाह्वयाणि तत्रेंद्राग्नियमनैरृत्याद्यधिप्रत्यधिदेवतोक्तानि खड्गचर्मधरो बालो निर्ऋतिर्न
रवाहनः महाकेशो विरूपाक्षः करालः कालिकाप्रियः नागपाशधरो रक्तभूषणः पद्मिनीप्रियः
वरुणो यादसांपतिः स्वर्णवर्णो मकरवाहनः वायुर्विनायकादि पंचकेऽप्युक्तः सोमो ग्रहेश्वर ईशान ब्रह्मा
सर्वलोकः अनंतसर्पः सप्तप्रत्यधिदेवताश्च इति द्विचत्वारिंशत् अथ सूर्यादीनां मंत्राः आकृष्णेने
ति मंत्रस्य हिरण्यस्तूप ऋषिः त्रिष्टुप्छंदः सूर्यो देवता सूर्यप्रीत्यर्थे जपे विनियोगः वैदिकप्र
योगे तेनावन्मात्रमेव आर्षं ब्राह्मणोक्तं प्रमादे शायत् अपि छंदो देवतमिति तेनाधिक इति का
त्यायनात् अधिकमंगमामासादि न कार्यं सर्ववैदिकविधिरिमाश्वलायनात् आगममते तंगमा
सादिकं भवत्येव तद्यथा आकृष्णेन शिरसि रजसा ललाटे वर्तमानो भ्रुवोः निवेशयन् हृदये अ
मृतं नाभौ मर्त्यं च कंठे हिरण्ययेन सविता ऊर्वोः रथेना जान्वोः देवो याति जंघयोः भुवनानि
पश्यन् पादयोः अथ करन्यासः आकृष्णेन रजसा अंगुष्ठाभ्यां नमः वर्तमानो निवेशयन् तर्जनी।
भ्यां नमः अमृतं मर्त्यं च मध्यमाभ्यां नमः हिरण्ययेन अनामिकाभ्यां नमः सविता रथेन कनि
ष्ठिकाभ्यां नमः देवो याति भुवनानि पश्यन् करतलकरपृष्ठाभ्यां नमः एवं हृदयादि अथ ध्यानं
ओं शोणांभोरुहसंस्थितं त्रिनयनं वेदत्रयीविग्रहं पादांभोजयुगाभयानि दधतं हस्तैः प्रभालप्र
भं केयूरांगदहारकंकणधरं कर्णोल्लसत्कुंडलं लोकोत्पत्तिविनाशपालनपरं सूर्यं गुणा।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰ प॰ ८

ऽभिभजे प्रकाशा[illegible]आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना
देवो याति भुवनानि पश्यन् ॐ अथ स्तोत्रम् लोमश उवाच द्वादशाष्टमजन्मस्थः सूर्यो वा सप्तमो
रविः पंचमो वा द्वितीयो वा दशमस्थेन दूषितः सव १ तदा सूर्यं प्रपूज्येन पूजनीयो विशेषतः नपोद्दा
नं प्रदातव्यं भोजनीया द्विजोत्तमाः २ शृणुष्वावहितो राजन् शुचिर्भूत्वा समाहितः सर्वकामप्रदं स्तो
त्रं सर्वपापप्रणाशनं ३ धौम्येन तु यथा पूर्वं पार्थाय कथितं शुभं नाम्नामष्टोत्तरशतं तन्मे शृणुष्व म
हामते ४ वैशंपायन उवाच ॐ सूर्योऽर्यमा भगस्त्वष्टा पूषार्कः सविता रविः गभस्तिमानजः कालो
मृत्युर्धाता प्रभाकरः ५ पृथिव्यापश्च तेजश्च खं वायुश्च परायणः सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक ए
व च ६ इन्द्रो विवस्वान् दीप्तांशुः शुचिः शौरिः शनैश्चरः ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वै वरुणो यमः वैद्युतो
जाठरश्चैव ऐन्धनस्तेजसां पतिः धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ७ कृतं त्रेता द्वापरश्च कलिः
सर्वामराश्रयः कला काष्ठा मुहूर्ताश्च पक्षा मासास्त्वहर्निशाम् ८ संवत्सरकरोऽश्वत्थः कालचक्रो वि
भावसुः पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः १० कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः
वरुणः सागरोंऽशश्च जीमूतो जीवनो हरिः ११ भूताश्रयो भूतपतिः सर्वभूतनिषेवितः स्रष्टा संवर्तको व
ह्निः सर्वस्यादिकरोऽमलः १२ अनन्तः कपिलो भानुः शीघ्रगः प्राणधारकः धन्वन्तरिर्धूमकेतुरादिदे
वोऽदितेः सुतः १३ मनुः सुपर्णो भूतादिः शीघ्रगः प्राणधारकः धन्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः ८ ७

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादशात्मारविंदाक्षः पितामाता पितामहः स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपं १५ देहकर्ता प्र
शान्तात्मा विश्वात्मा विश्वतोमुखः चराचरात्मा सूक्ष्मात्मा मैत्रेणवपुषान्वितः एतद्वै कीर्तनीयस्य सू
र्यस्यामिततेजसः नामाष्टशतकं प्रोक्तं शक्रेणापि महात्मना १६ शक्राच्च नारदः प्राप्तो धौम्यस्तु तद
नन्तरम् धौम्याद्युधिष्ठिरः प्राप्य सर्वान्कामानवाप्नुयात् १८ पितृदेवगणायक्षसेवितं ह्यसुरनिशाच
रसिद्धसेवितं वरकनककुताशनप्रभं प्रणतोस्मि हिताय भास्करं १९ सूर्योदये यः सुसमाहि
तः पुमान्पठेत्स्तोत्रं धनरत्नसंचयं लभेत जातिस्मरतां सदा नरः स्मृतिं च मेधां विपुलां च कीर्ति
म् २० इदं स्तवं देववरस्य यो नरः प्रकीर्तयेच्छुद्धमनाः समाहितः स मुच्यते शोकदवाग्निसागरा
ल्लभेत कामान्मनसा यथेप्सितान् २१ इत्यार्ष पर्वणि सूर्याष्टोत्तरशतनामस्तोत्रं समाप्तम् ॐ
अस्य वेदस्य इन्द्रं देवा इति मन्त्रस्य देवा ऋषयः अतिधृति छन्दः सोमो देवता इन्द्रप्रीत्यर्थे जपे वि
नियोगः इन्द्रं देवः शिरसि असपत्नं ललाटे सुवधं नासिकायाम् महते तत्त्राय मुखे महते ज्ये
ष्ठाय हृदये महते ज्यानराज्याय उदरे इन्द्रस्येन्द्रियाय नाभौ इमममुष्य कट्यां पुत्रममुष्यै मे पुत्र
मस्यै ऊर्वोः विशंप्रवेजानुनोः सोमराजा जंघयोः सोमोस्माकं गुल्फयोः ब्राह्मणानां राजा पाद
योः अथ करन्यासः इन्द्रं देवा असपत्नं सुवधं अंगुष्ठाभ्यां नमः महते तत्त्राय महते ज्यैष्ठाय
तर्जनीभ्यां नमः महते जानराज्यायेन्द्रस्येन्द्रियाय मध्यमाभ्यां नमः इमममुष्य पुत्रममुष्यै पुत्रम

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र. हय. ९

सेश्वनामिकाभ्यां नमः विशएषवोमीराजाकनिष्ठिकाभ्यां नमः सोमोस्माकंब्राह्मणानां राजा
करतलकरपृष्ठाभ्यां नमः एवंहृदयादिन्यासः अथ ध्यानम् शंखप्रभमेणप्रियंशशांकमीशान।
मौलिस्थितमीड्यवृत्तं नमोमघोगांबुजयुग्महस्तं ध्यायेहृदब्जेशशिनंग्रहेशं प्रकाशः इमन्देवाः
असपत्नंसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय इमममुष्यपुत्र
ममुष्यैपुत्रमस्यैविशः एषवोमीराजासोमोस्माकंब्राह्मणानांराजा १ अथस्तोत्रम् सोमोऽत्रि
गोत्रसंभूतोरुद्रस्थानेयदाभवेत् पूजाकार्याप्रयत्नेनश्वेतरक्तैर्जपादिभिः २ शशीचंद्रस्तथासोम
शशांकोहिमवाहनः तारापतिश्चद्विजराट्लक्षणांकोह्यग्निगोत्रजः ३ हिमांशुश्चंद्रमाश्चंद्रइन्दुःकु
मुदबांधवः सिंधुः सुधांशुः सुधाधारोषधीशोनिशापतिः अब्जोजैवातृकःसोमोग्लौर्मृगांकःक
लानिधिः हिमद्युतिनिशानाथोद्विजानामधिपकृत्सदा ४ द्विजौषधिनिशाधीशः तारेशःपितृदेवताः
वत्सभट्टःशालिलवान्नेशःकिरीश्वरः ५ द्विजराजश्शशिधरोनक्षत्रेशःक्षपाकरः धर्मदोधनदो।
धीमान्महापातकहानिकृत् ६ सर्वसौभाग्यदातांचहिमांशुंप्रणमाम्यहं एतत्स्तोत्रंपठेन्नित्यंसर्वा
न्कामानवाप्नुयात् ७ तृष्णाहद्दादशास्थोवायदाचंद्रःप्रजायते तदास्तुतिःप्रकर्तव्यासर्वपीडानिवा
रणी ८ इतिकपिलपंचरात्रेचंद्रस्तोत्रंसमाप्तम् अथभौमस्य, ॐअस्यश्रीअग्निर्मूर्द्धा इतिमं
त्रस्य विरूपाक्षऋषिर्गायत्रीछन्दोभौमोदेवताभौममन्त्रेपविनियोगः ॐअग्निःशिरसि मूर्द्धा

९

© Dharmartha Trust J&K. Digitized by eGangotri

ललाटे दिवःमुखे ककुत्हृदि पतिउदरे पृथिव्यानाभौ अयंकट्यौ अपांजान्वोः रेतांसिगुल्फ
योः जिन्वतिपादयोः अथकरन्यासः अग्निर्मूर्द्धाअंगुष्ठाभ्यांनमः दिवःतर्ज्जनीभ्यांनमः ककुत्पतिः
मध्यमाभ्यांनमः पृथिव्याः अयंअनामिकाभ्यांनमः अपांरेतांसिकनिष्ठिकाभ्यांनमःजि
न्वतिकरतलकरपृष्ठाभ्यांनमः एवंहृदयादिन्यासः अथध्यानम् ॐजपाभंशिवस्वेदजंहस्तप
द्मैर्गदाशूलशक्तीवरंधारयंतं अवंतीसमुत्थंसुमेषासनस्थंधरानंदनंरक्तवर्ण्णंसमीडे प्रकाशः
ॐअग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याःअयम् अपांरेतांसिजिन्वति अथभौमस्तोत्रं शंक
रउवाच ॐशृणुदेविप्रवक्ष्यामिभौमस्तोत्रमनुत्तमं यत्पठित्वाद्दशोभौमोह्यष्टमेवाप्यदोभवेत् पठनी
यंतदास्तोत्रंसर्वकामार्थसिद्धिदम् मंगलोभूमिपुत्रश्चऋणहर्त्ताधनप्रदः स्थिरासनोमहाकायः
सर्वकर्मावरोधकः लोहितोलोहिताक्षश्चसामगानांकृपाकरः ३ धरात्मजःकुजोभौमोभूतिदोभू
तिवर्द्धनः अंगारकोयमश्चैवसर्वरोगापहारकः ४ वृष्टिकर्त्ताऽपहर्त्ताचसर्वकामफलप्रदः एतानि
कुजनामानिनित्यंयःश्रद्धतःपठेत् ५ ऋणंनजायतेतस्यधनंशीघ्रमवाप्नुयात् अथारवापकतेनैवा
लिहिंगारकेणाव ६ एकविंशतिनामानिपठनीयानिनित्यशः रेखांतामार्ज्जयेत्पश्चाद्दामपादे
नसर्वदा ७ ऋणंनजायतेतस्यभूमिपुत्रप्रसादतः इत्थध्यानस्यपीडनस्तोत्रपाठान्नसंशयः ८ इ
तिकपिलपंचरात्रेहरपार्वतीसंवादेमंगलस्तोत्रंसंपूर्ण्णंसमाप्तम् अथबुधस्य उद्बुध्यस्वेतिमंत्रा

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र.
प.प.
१०
10

स अग्निऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधप्रीत्यर्थे जपे विनियोगः उद्बुध्यस्वेति शिरसि अग्ने
प्रति ललाटे जागृहि त्वं मुखे इष्टापूर्ते हृदये सं सृजेथामयं च नाभौ अस्मिन्सधस्थे कसो ।
अध्युत्तरस्मिन् ऊर्वोः विश्वेदेवा जानो यजमानश्च गुल्फयोः सीदत पादयोः अथ करन्यासः उ
द्बुध्यस्वाग्ने प्रतिजागृहि त्वं अंगुष्ठाभ्यां नमः इष्टापूर्ते तर्जनीभ्यां नमः सं सृजेथामयं च मध्यमा
भ्यां नमः विश्वेदेवा यजमानश्च कनिष्ठिकाभ्यां नमः सीदत करतलकरपृष्ठाभ्यां नमः एवं हृदा
द्यादिन्यासः अथ ध्यानम् सोमात्मजं हंसगतं द्विबाहुं शंखेन्दुरूपमसिपाशगदाब्जहस्तम् द
यानिधिं भूषणभूषितांगं बुधं स्मरे मानसपंकजेहम् १ ॐ प्रकाशः ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि ।
त्वमिष्टापूर्ते सं सृजेथामयं च अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत १ अथ ।
स्तोत्रम् ईश्वर उवाच अथातः संप्रवक्ष्यामि बौधं स्तोत्रं पवित्रकम् सर्वसौभाग्यदातारं सर्वकाम
प्रदायकम् १ बुधो ग्रहो मनुष्याणां यदासामाम्मतो वनेत्त महाकृता यकर्तव्या बुधस्तोत्रं पठेद्बुधम्
नमस्तेस्तु महासौम्य सर्वमंगलदायक नमस्ते सोमपुत्राय नमस्ते रोहिणीसुत २ नमस्ते सर्वक
ल्याणनमस्ते वृद्धिप्रिय रौहिणेय नमस्तेस्तु सर्वकल्याणकारक ४ रौहिणेय भयधस्त्रमूलायांर ।
मणो बुधः यः पचात्सविष्टाभूःश्रणामांगो रोहिणीसुतः ५ बुधसोमसुतश्चैव पंडितो बहुवनया ।
सर्वसौभाग्यदाता च सर्वमंगलदायकः ६ बुधपीडा न भवति सर्वपापं विनश्यति वत्रविंशतिना

२
१०

© Dharmartha Trust J&K. Digitized by eGangotri

मानिष्यातःकालेपठेन्नरः ७ दुःस्वप्नाकार्य्यंप्रयत्नेनबुधपीडानजायते एतत्स्तोत्रंपठेन्नित्यंब्राह्म
णैस्सुतैर्बोधुते ८ सर्वमंगलमाप्नोतिनान्यकार्याविचारणा इतिकपिलरात्रेपंचरात्रेबुधस्तोत्रं
अथबृहस्पतेः बृहस्पतेरितिमंत्रस्य गृत्समदऋषिः त्रिष्टुप्छंदः बृहस्पतिर्देवता बृहस्पतिप्री
त्यर्थंजपेविनियोगः बृहस्पतेशिरसि अतियदर्यो ललाटे अर्हाद्युमद्भ्रुवे विभातिक्रतुमत्हृ
दये जनेषुनाभौ यद्दीदयतकसां दवसस्तनप्रजा ऊर्वोः तदस्मासुद्रविणंजान्वोः धेहिगुल्फयोः
चित्रंपादयोः अथकरन्यासः बृहस्पतेअतियदर्योअंगुष्ठाभ्यांनमः अर्हाद्युमत्तर्जनीभ्यांनमः
विभातिक्रतुमत्मध्यमाभ्यांनमः जनेषुअनामिकाभ्यांनमः यद्दीदयच्छवसऋतप्रजाततद
स्मासुकनिष्ठिकाभ्यांनमः धेहिचित्रंकरतलकरपृष्ठाभ्यांनमः एवंहृदयादि अथध्यानम्।
ॐरत्नाष्टापदवस्त्रराशिममलंदक्षात्किरंतंकरादासीनंविपणौकरंनिदधतंरत्नादिराशौपरम्
पीतालेपनवस्त्रपुष्पमखिलालंकारसंभूषितम् विद्यासागरपारगंसुरगुरुंवंदेसुवर्णद्युतिम्
प्रकाशः बृहस्पतिः अतियदर्यो अर्हाद्युमद्विभातिक्रतुमज्जनेषु यद्दीदयच्छवसऋतप्रजा
ततदस्मासुद्रविणंधेहिचित्रम् १ अथगुरुस्तोत्रम् अथातःसंप्रवक्ष्यामिगुरोःस्तोत्रंसुखप्रदम्।
षष्ठाष्टमेद्वादशेवचतुर्थेधर्मकर्मणि दुःस्थितेहिगुरुर्यस्यतदानःशुभदायकः तदास्तुतिप्रक
र्तव्यागुरुपीडानजायते १ बृहस्पतेनमस्तेस्तुसुराचार्यनमोनमः वाचस्पतेनमस्तेस्तुसर्वक

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
बृ॰प॰
११

सााग्यदायक ३ सर्वदाय नमस्तेस्तु सर्वमंगलदायक नमस्ते विश्वकर्त्रे च नमस्ते प्राणरक्षक ४
वाचस्पते नमस्तेस्तु सर्वमंगलदायक विश्वात्मा च मुनिश्रेष्ठः गीष्पतिः प्रियदर्शनः ५ सर्वदात्र
ष्टसर्वेशः सर्वज्ञः सर्वशूजितः अक्रोधन मुनिश्रेष्ठो नीतिकर्ता जगत्पतिः ६ भूम्नुबोधनदाता च म
ताजीवो महाबलः शान्तिदः स्त्रिदशाचार्यो दिविभूमो शरीरिणः ७ गुरुर्महासागरोसि पिङ्गदो
धर्मदर्शिकः नाम्नाद्वाविंशतिं स्तोत्रं यः पठेत्तिनरो नमः ८ इष्टा च गुरुजापीशनाशं प्राप्नोति न संश
यः दानेस्वर्णगौः पीतावस्त्र लवणशर्करा ९ हवनेवैश्वकर्तव्यं ततो ब्राह्मणभोजनं बृहस्पतेनि
मेत्रेणपूजयेत् कुंकुमेन च १० इति बृहस्पति स्तोत्रम अथ गुरुकस्य अस्य श्रीगुरुकमंत्रस्य कौत्सो
गिरसऋषिः बृहतीछंदः गुरुर्देवता गुरुजपेविनियोगः अनामयिस्त्वनः शिरसि रसं ब्राह्म
णोललाटे अपिवनत् तत्त्र मुखे पयः सोमं हृदये प्रजापतिर्नाभौ ऋतेन सत्यं कक्षौ इंद्रियं विपा
नं गुदे शुक्रं वृषणयोः अन्धस ऊर्वोः इंद्रस्येंद्रियं जान्वोः इदं पयः गुल्फयोः अमृतं मधु पादयोः ।
अथ करन्यासः अनामयिक्षत्र अंगुष्ठाभ्यां नमः रसं ब्राह्मणा अपिवत् तर्जनीभ्यां नमः तत्त्रेप
यः मध्यमाभ्यां नमः सोमं प्रजापतिः अनामिकाभ्यां नमः ऋतेन सत्यमिंद्रियं कनिष्ठिकाभ्यां न
मः विपान शुक्रमन्धस इंद्रस्येंद्रियमिदं पयोमृतं मधु करतलकरपृष्ठाभ्यां नमः एवं हृदया
दि अथ ध्यानम स्वेतांभोजनिषण्णमापणतटे श्वेताम्बरालेपनं नित्यं भक्तजनाय संप्रददं तं वा । ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सोमहीणीहाटकम्र वामेनैवकरेणादक्षिणाकरेणाम्रानमुद्रांकितंशुक्रंदैत्यवराचितंसित-
मुद्वेवेदसितांगंप्रभं १ प्रकाशः ॐअस्मन्नाम्यारिक्तोरंमत्रबालानांम्नपिवतत्त्वमम्यःसोमस्प्रजा-
पतिः अनेनसमसिद्धिद्येविधानं ४ शुक्रमंधमः इंद्रियैद्रियसिद्धयस्ययोमन्तेमधुइति अथशु-
क्रस्तोत्रम् ईश्वरउवाच शृणुदेविप्रवक्ष्यामिशुक्रस्तोत्रंशुभप्रदं रहस्यंपरमंदेविगुह्याद्गुह्यतरंपरा-
यामले नमस्कर्मंतथाषष्ठेसप्तमेवाष्टमेभृगुः यहस्येवदशावेलायांमत्युवेदक्षिणायदा २ त-
दास्तुतिंप्रकुर्वीतपूजाकार्याविजानता देवमंत्रिनमस्तेस्तुभार्गवायनमोनमः ३ कवेशुक्रन-
मस्तेस्तुशानश्चैवनमोनमः भृगवेचनमस्तुभ्यंदैत्याचार्यायतेनमः ४ घोरुशायनमस्तुभ्यंसुरा-
रिगुरवेनमः नमस्त्रायोमयायचामृतमयायजीविने ५ नमोभृगूणांपतयेनमस्तेभयदायिने
एतानिशुक्रनामानिप्रातरुत्थाययःपठेत् ६ तस्यशुक्रोऽनुवापीडांकदाचिन्नैवजायते ७ एतत्स्तो-
त्रंपठित्वायःसंग्रामेप्रविशेन्नरः सजित्वासमरेशत्रून्भृगवराजप्रसादतः ८ बालानांभोजनेप्रोक्तंच
शुक्रपीडानिवारणं महापापविनिर्मुक्तोधनधान्यसमन्वितः ९ भृगुर्जोदैत्यमंत्रीचउशनाभार्ग-
वःकविः श्वेतांशुर्मंदलोकाश्चविधिज्ञोनिर्मलतिस्तथा १० एतानिभृगुनामानियःकीर्तयतिनित्य-
शः प्रतिशुक्रंततस्यापिदीर्घमायुश्चविंदति ११ इतिकपिलपंचरात्रेभृगुस्तोत्रंसमाप्तम् ॥ ॥ अथा-
शनिः शंनोदेवीरितिमंत्रस्य दध्यंगाथर्वणऋषिः गायत्रीछंदः शनिर्देवता शनिप्रीत्यर्थेजपे-

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र.
प.प.
१२

12

विनियोगः शन्नः शिरसि देवील्ललाटे अभिष्टये मुखे आपोभवन्तु नाभौ पीतये कण्ठे शंयोः हृत् स्रवीः
अभिजान्वोः स्रवन्तु नः पादयोः अथ करन्यासः शन्नो देवी रिमं गुष्ठाभ्यां नमः अभिष्टये तर्जनीभ्यां
नमः आपोभवन्तु मध्यमाभ्यां नमः पीतये अनामिकाभ्यां नमः शंयोरभि कनिष्ठिकाभ्यां नमः स्र
वन्तु नः करतलकरपृष्ठाभ्यां नमः एवं हृदयादिन्यासः अथ ध्यानम् ॐ नीलांजननाभं मिहिरेष्टपुत्रं ग्र
हेश्वरं पाशभुजंगपाणिं सुरासुराणां भयदं द्विबाहुं शनिं स्मरे मानसपंकजे हम् मकाशः ॐ शं
नोदेवीरभिष्टये आपोभवन्तु पीतये शंयोरभिस्रवन्तु नः ॐ अथ शनिस्तोत्रम् कोणान्तको रौद्रय
मोऽथ बभ्रुः कृष्णः शनिः पिंगलमन्दसौरिः नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय
सुराः सुराः किंपुरुषाः रगेन्द्राः गंधर्वविद्याधरपन्नगाश्च पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्री
रविनन्दनाय २ नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगाः पीड्यन्ति सर्वे विषमस्थितेन
तस्मै नमः श्रीरविनन्दनाय ३ प्रयागकूले यमुनातटे वा सरस्वती पुण्यजले गुहायां यो योगिनां ध्या
यमतोऽति सूक्ष्मं तस्मै नमः श्रीरविनन्दनाय ४ देशानि दुर्गाणि वनानि यत्र ग्रामाणि वेश्मानि पुराणि
लनानि शैलेशगद्यानि लयं प्रयाति तस्मै नमः श्रीरविनन्दनाय ५ तिलैर्यवैर्माषगुडान्नदानैः।
लोहेन नीलाम्बरदानतो वा प्रीणाति योगे निजवासरे च तस्मै नमः श्रीरविनन्दनाय ६ अन्यप्र
देशः पठति प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च करोति राज्यं भुवि भोग सौख्यं प्रयाति निर्वाणपदं

१

२

© Dharmartha Trust J&K. Digitized by eGangotri

तयाते १० इति वेदव्यासविरचितं शनिस्तोत्रं समाप्तम् अथ राहुः अस्य श्रीराहुमंत्रस्य प्रजापतिरृ
षिर्गायत्री छंदः राहुर्देवता राहुप्रीत्यर्थे जपे विनियोगः कयानः इति शिरसि विद्मः आभुव ल
लाटे हतीमहापृधः मुखे सखोनाभौ कयाकसा शाविष्ठयाजानुनोः हृतापादयोः अथ करन्या
सः कयानश्चित्र आंगुष्ठाभ्यां नमः आभुवत्तर्जनीभ्यां नमः हतीमहामध्यमाभ्यां नमः वृधासखो
अनामिकाभ्यां नमः कयाकनिष्ठिकाभ्यां नमः शाचिष्ठयावृता करतलकरपृष्ठाभ्यां नमः एवं
हृदयादिन्यासः अथ ध्यानम् शीतांशुमित्रान्तकमीड्यरूपं घोरं च वैडूर्यनिभं द्विबाहुम् त्रैलोक्य
रक्षाकरमिष्टदं च राहुं भजे मानसपंकजेहम् १ मंत्रः ॐ कयानश्चित्र आभुव हतीमहापृधः ।
सखोकयाशाचिष्ठयावृता १ अथ राहुस्तोत्रं नारद उवाच अथातः संप्रवक्ष्यामि राहुस्तोत्रमनुत्तमं
सर्वरोगप्रशमनं सर्वसंपत्प्रदायकं सैंहिकेयो यदा दुष्टः प्राणिनां दुःखदायकः तदा स्तुतिं प्रकुर्वी
तयो शांतस्तेन जायते २ नमस्ते सिंहिकापुत्र विधुवदनमोस्तुते स्वर्भानवे नमस्तुभ्यं तमसे च नमो न
मः ३ राहवे च नमस्तुभ्यं महाहारे ग्रासकारकं चंद्रमर्दन नमस्तुभ्यं राहवे च नमो नमः ४ हार्धिपतये न
मः सर्वकामार्थदेल्हाणां सिंहिवन नमो नमः ५ कायहीन नमस्तुभ्यं महाहारे ग्रासकारकं चंद्रमर्दन
नमस्तुभ्यं राहवे च नमो नमः ६ देशे वर्बरके जात शीर्षकर्णविवर्जितः गोत्रेपैठीनसे ह्यस्मिन् सिंहारू
ढ वरप्रदः ८ महासुखन नमस्तेस्तु राहो ग्रहन नमो नमः एतत्स्तोत्रं पठेन्नित्यं पीडा शांतस्तेन जायते १०।

दानेरेयश्रीफलेचपीतवस्त्रंचनीलकम् कांश्यपात्रंप्रदेन्नित्यंचगुरवादानंसौवर्णंदक्षिणातथा इतिना
ग्रहपंचरात्रेराहुस्तोत्रंसमाप्तम् अथकेतोः केतोःकृण्वन्नितिमंत्रस्य मधुच्छंदऋषिः गायत्रीछंदः
केतुर्देवता केतुग्रहप्रीत्यर्थेजपेविनियोगः केतुमितिशिरसि कृण्वन्ललाटे अकेतवेमुखे पेशो
हृदये मर्यानाभ्यां अपेशसेकट्यां समुर्वोः उषद्भिःजान्वोः अजायतपादयोः अथकरन्यासः केतोः।
कृण्वन्निति अंगुष्ठाभ्यांनमः अकेतवेतर्जनीभ्यांनमः पेशोमर्यामध्यमाभ्यांनमः अपेशसेअनामिका
भ्यांनमः समुषद्भिःकनिष्ठिकाभ्यांनमः अजायथकरतलकरपृष्ठाभ्यांनमः एवंहृदयादिन्यासः
अथध्यानम् धूम्रोद्विबाहुर्वरदोगदाभृत्गृध्रासनस्थोविकृताननश्च किरीटमालीचकरालने।
त्रःछायात्मजाकेतुगणःप्रशान्तः १ यकाश्यः केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसेसमुषद्भिर
जायथ १ अथकेतुस्तोत्रम् शिवउवाच शृणुदेविप्रवक्ष्यामिकेतुस्तोत्रंमहत्परं येपठंतिनरानि
त्यंकेतुपीडानजायते २ केतवेचनमस्तुभ्यंशिखिनेचनमोनमः अधिष्ठातेनमस्तुभ्यंवरदायनमो।
नमः ३ सोमस्याधिपतेनित्यंग्रहाधिपतयेनमः मलयाद्रिसमुत्पन्नद्विभुजायनमोनमः ४ केतवे
विबुधाकारसर्वोपचनमोनमः धूम्रकेतुर्नमस्तस्मैसिंहिकायनमोनमः ५ सर्वप्रलयकर्त्तास्वंम।
हाकेतुर्नमोनमः महाकेतोमहाप्रलसर्वकेतुसमन्वितः ६ अष्टोयहापोदोषोभ्यस्तातामवग्र।
हाणम् एतद्देवीर्नयेन्मर्त्यःकेतुस्तोत्रंशुभप्रदं ७ केतुपीडानजायेतसुखीचभवतिमानवः वास्त।

© Dharmartha Trust J&K. Digitized by eGangotri

ण्यान्मोनयेत्स्वाकूष्ठाभक्तिसमन्वितः ८ इति कपिलपंचरात्रे केतुस्तोत्रं समाप्तम् अथ ग्रहदानानि
कौशेयं वस्त्रयुग्मं हेममृत्ताम्रकलशं वा गोर्णं वरं कुंकुमं माणिक्यं च गुडं प्रवालं कमलं मधेलयाविलितेम ।
गावा गासनरक्तं चंदनं स्नूतं गोधूमं नानाफलम् सूर्याय यजनं वरक्तं मसनं धेनुः सवत्सा शृहेम ।
शंखं स्फाटिकमौक्तिकं गजमदं वज्रं धरातंदुलाः इत्यं च सुविकारपदस्य असनं तोहा स्वयशैव्य फल
म् कर्पूरं सितवस्त्रपांडुवृषभः कस्तूरिका चंदनम् गावा रत्नवर्णोत्तमानुरागं च दद्यादिति धीः
ताम्रं चामरमायुधं त्रितिगुडौ कौशेयरक्तांबरं तिके रक्तकं चंदनं रक्तकुसुमं गोधूमं केकुंकुमं ।
गावां च मसूरकाम्य गमदं स्वर्णं फलं विद्रुमं भौमाय प्रवदंति वासनमथो गोवृषं कं चंदनं ३।
दासी दासमहीफलानि तुरगं गंगा फलं स्तं गोघृतं मुद्गं तंदुलचामरायुधगजं कांस्यं शृहं हाटकं क
र्पूरं हरिचंदनं मरकतं वैनागदं तामसं इत्थं भौमवरं सुयासमदगामदं देयं बुधाय प्रह्लुतम् ४ ना
गोना गमदं स्नयानकनकं कौशेयपीतांबरं छत्रं चामरपुष्पगागातुरंगं त्वोणीं शृहं शर्करा पी।
तान्नं रजनी च पुष्पकफलं शेष्यं च कस्तूरिका तोदं गो पुगलोणि वस्त्रलवणं सदीप्तं तवे गुरोः ५
वज्राश्वं तितितंदुलाम्बरजतं शुभ्रां वरं मौक्तिकं कस्तूरी हरिचंदनं सितहयः गावा रसूर्णां वरं ।
कौशेयां स्त्रकगंधपुष्पकमथो गं श्रीरथं कंबलं सालिग्राममशिलेन्तु गां सुशायनं शुक्राय दद्या
त्सदा ६ मायाल्तेविमलेंद्रनीलमहिषी दासाः पतत्रीतिला स्तैलं लोहतुरंगमसीसकरभाद्रा

वं०
२

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र.
ग्र.प्र.
२८
14

मः ऊलथ्याश्चः गणामाकान्नमुपानहं स्वगमहं गां कृत्स्नवर्णां तथा मेदोघ्नमवदेतिलैषोडशाम
हादानानि स्मकेवलम् ७ राहोर्दानं हिरण्यं च गोमेदो लोहकं बले महिषीनागकृष्णं च सतिलं
ताम्रभाजनम् ८ वैडूर्यं रत्नं सतिलं च तैलं स्मकेवलं छागं मदो स्मगस्य शास्त्रं च केतोः परितो
षहेतोः कृतं रितेदानमिदं स्मृतं नीदेः ९ इति व्यवहारनिर्णये सप्तग्रहस्नानानि विष्णुधर्मोत्तरे
मंजिष्ठमदमातंगांकुंकुमं रक्तचंदनं सूर्णकुंभे कृतेनात्र स्नानं विधीयते मदमातंगराज ।
मदमिमर्थ्यः उशीरं च शरीषं च कुंकुमं रक्तचंदनं शंखं समस्तमिदं स्नानं चेद्दोषविनाशनम् २
त्वदिरिं देवदारुं च तिलानामलकानि च सूर्णकुंभे कृते तोयं भौमपीडाविनाशनं ३ नदीसंगम
तोयानि तन्मृदासहितानि च मस्त्लानि कुंभे माहेये बुधपीडाविनाशनं ४ माहेयमरणमयेइम
र्थ्यः औदुंबरं तथा विल्वं वटमामलकं तथा मस्त्तत्कुंभे सौवर्णेनीवपीडाविनाशनम् ५ गोरो
चनां नागमदः शतपुष्पा पुनर्नवा विमस्त्ना राजते कुंभे शुक्रपीडाविनाशनं ६ तिलांमाषांश्रिये
गुं च गंधपुष्पं तथैव च मस्त्लं कांस्यपसेकुंभे सौरिपीडाविनाशनं ७ गुग्गुलं हिंगुलं तालं शुभ्रांचैव
मनःशिलां शृंगे च माहिषमस्त्ले राहुपीडाविनाशनं ८ मालेहविताल मिनमर्थ्यः वराहनिहतोग्रा ।
जनूपर्वताग्रमृदैनथा कागहीरंत्वङ्पात्रे केतुपीडाविनाशनं इति सर्वग्रहपीडानिवारके सर्व
ग्रहौषधीस्नानम् दीपिकायाम् सप्रियंगुरजनीद्वयमांसीकुष्ठलाजसितसर्षपपत्रैः वारिभिः । १७

© Dharmartha Trust J&K. Digitized by eGangotri

मह्ववैः सह्लोधैः स्नानमन्निनिवलेग्रहपीडं १ वारिभिस्तीर्थवारिभिर्निरघैः शुक्लारिमिति

तन्नमोषधीमाहवर्ण्णाम् इति ग्रहनवग्रहगायत्र्यः ॐ आदित्याय विद्महे दिवाकराय धीमहि

तन्नः सूर्यः प्रचोदयात् १ अत्रिपुत्राय विद्महे सागरजाय धीमहि तन्नश्चन्द्रः प्रचोदयात् २ क्षिति

पुत्राय विद्महे लोहिताङ्गाय धीमहि तन्नो भौमः प्रचोदयात् ३ ॐ चन्द्रपुत्राय विद्महे रोहिणीया

य धीमहि तन्नो बुधः प्रचोदयात् ४ अङ्गिरोजाय विद्महे वाचस्पतये धीमहि तन्नो गुरुः प्रचोदया

त् ५ भार्गवाय विद्महे श्वेतवाहनाय धीमहि तन्नः शुक्रः प्रचोदयात् ६ कृष्णवर्णाय विद्महे रवि।

पुत्राय धीमहि तन्नः शौरिः प्रचोदयात् ७ नीलवर्णाय विद्महे सैंहिकेयाय धीमहि तन्नो राहुः

प्रचोदयात् ८ धूम्रवर्णाय विद्महे मरुत्जाताय धीमहि तन्नो केतुः प्रचोदयात् ९ अथ नवग्रहधी।

तये महामौल्यरत्नधारणम् यदाह कश्यपः सूर्यादीनाञ्च सन्तुष्ट्यै माणिक्यं मौक्तिकं ततः सवि।

द्रुमं मरकतं पुष्परागं च वज्रकम् नीलं गोमेदवैदूर्यं धार्य्यं शास्त्रे हि क्रमात् अलाभे मौलिरत्नधार।

णे उक्तं च श्रीपतिना धार्य्यं तत्रैव विद्रुमं भौममान्वोः शौण्यं शुक्रेन्द्वोः स्वहेमेन्दुजस्य मुक्ता सूर्ये लोहम

काम्नं तस्य लाजावर्त्तः कीर्त्तितः शेषयोश्च इति दीपिकाकारस्तु ॐ षधीमूलानि धार्य्याणीत्याह

मूले धार्य्यं बिल्वमूलः सवितुर्विहितं ततो मातृकामूलमिन्दो जिह्वान्ते भूमिपुत्रे रजनिकरसुते वृद्ध।

धारोश्च मूलम् भार्गीजीवे यमुके भवति शुभकरं सिंहपुच्छस्य मूलम् वाच्छोलं च वार्कपुत्रे नम।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र०
घ०प०
२५

15

स्मिमलयज्ञेकेनदोषेस्वगाम्यः २इति॥ अथग्रहहोमसमिधः कर्त्ताहृतवेग्रहानितिक्रतेः ग्रहाणां
समिधाहुतिरितिस्मरतेस्मः याज्ञवल्क्यः अर्कः पलाशखदिरश्चापामार्गोथपिप्पलः उदुंबरशमी
दूर्वाः कुशाश्च समिधः क्रमात् १ ईश्वरादिदेवतानां तत्तत्समिद्भिर्वा होमः पलाशेन वा हेमाद्रौ दे
वीपुराणे गणाधिपतयेदेवाग्रथमानुवराहुतिः अन्यथा विफलं होमः भवतीह न संशयः १ आ
श्वलायनः जुहुयात्समिदाज्येनाभिश्रग्गमिर्थयाक्रमं १ याज्ञवल्क्यः होतव्यामधुसर्पिर्भ्यां दध्ना
क्षीरेणवायुता इतिकामनाविशेषसमिधः अर्कोनाशयतेव्याधीन्पालाशः सर्वकामदः खदिरो
ऽर्थलाभायस्यादपामार्गीष्टदायिनी प्रजालाभायचाश्वत्थीस्याद्औदुम्बरीमता शमीशमयतेपापं
दूर्वादीर्घायुरावच २ कुशाधर्मविवृद्ध्यर्थं इति जुहुयाद्देवप्रीतये सत्वचः समिधः कार्याः ऋजवः श्ल
क्ष्णाः समास्तथा दशस्याद्दशांगुलास्तास्तुद्वादशांगुलकास्तुवा आर्द्राः पक्वाः समच्छेदास्तर्जन्यंगुलव
र्तुला अपाटिताविशाखाश्च कृमिदोषविवर्जिताः ईदृश्यो होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियं समिध
विश्वेदश्वत्थः प्रादेशसंमिताः इति अन्यद्व्या इतिमानमुक्तं देवीपुराणे यवव्रीहितिलतीरति
लकेश्वमासिका पंकजाशीरविल्वार्कदलाहोमेप्रकीर्तिताः १ कर्षमात्रं घृतं होमे शुक्तिमात्रं
पयःस्मृतं दधिःप्रसृतिमात्रं स्याल्लाजास्तुमुष्टिसंमिताः पृथुकास्तन्यमाणाः स्युः शर्करा चैव तथोदिताः
गुडः पलार्धमात्रःस्यात्कर्करापितथास्मृता एकैकं पत्रपुष्पाणितथाग्रंथांस्तुकल्पयेत् कदलीफल

१५

यद्दामानेविशिष्टःपरिशिष्टः

© Dharmartha Trust J&K. Digitized by eGangotri

कदलीफलनारंगफलान्यैकैकशो विदुः मातुलुंगं चतुःखंडं पनसं दशधाकृते अष्टधा नालिकेरं
तत्कूष्मांडस्य भागतः त्रिधाकृते फले बिल्वकपित्थे च विशिते द्विधा अंशेशे मोदकापूपावष्टांशो ।
मूलकंदकौ पर्वैलाद्यंगुलालावलीवंट्टु वंदनं कुंकुमं वल्लमात्रा च कस्तूरी गुग्गुलं बदराष्ठिवत च
नः प्रशितिलैः प्रोक्ता तिलानामाहुतिर्बुधैः इक्षुः स्रुवेण होतव्यः पाणिना कठिनं हविः स्रुवश्चैणाद्रवाः
प्रोक्ताः कठिनाश्चास्य माशाय तं किंचिज्जुहुयाद् द्वितीयतत्सर्वं भागपूर्वकं अष्टधा कृते तेषु तुल्यं कंसस्य
पद्यते यत्रयागे प्रकुर्वीत संकल्पं तत्र नावेरत् भागःहीने प्रकर्तव्यः संकल्पो जपहोमयोः इति अथ
पापमयः अथातः संप्रवक्ष्यामि यदुक्तं पद्मयोनिना ब्राह्मणानां हितार्थाय संस्कारार्थं च भाषितं
लौकिकः पावको ह्यग्निः प्रथमः परिकीर्तितः अग्निस्तु मारुतो नाम गर्भाधाने विधीयते १ पुंसवने चा
द्रमसः शुंगाकर्मणि शोभनः सीमंते मंगलो नाम प्रगल्भो जातकर्मणि २ नाम्नि वै पार्थिवो ह्यग्निः प्रा
शने तु शुचिः स्मृतः सत्यो नामाथ चूडे स्याद् व्रतादेशे समुद्भवः ३ गोदाने सूर्यनामा तु केशांते ह्यग्निरुच्य
ते वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः ४ चतुर्थ्यां तु शिखी नाम धृतिरग्निस्तथापरः आवसथ्यो
भवो नाम वैश्वदेवे तु पावकः ५ ब्रह्मा वै गार्हपत्ये तु ईश्वरो दक्षिणे तथा विष्णुराहवनीये तु अग्निहो
त्रे त्रयो मताः ६ लक्षहोमे वह्निनामा कोटिहोमे हुताशनः प्रायश्चित्ते विधिश्चैव पाकयज्ञे तु साहसः ७
देवानां हव्यवाहस्तु पितॄणां कव्यवाहनः पूर्णाहुत्यां मृडो नाम शांतिके वरदः स्मृतः ८ पौष्टिके बलदश्च

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
य॰ प॰
१६

16

वक्रो धाग्निश्चाभिचारिके वश्यार्थे कामदो नाम वनदाहे तु वर्द्धनः ९ कोष्ठे तु जठराग्निः स्यात्क्रव्यादो मृ-
तभक्षणे समुद्रे वडवो ज्ञेयः क्षये संवर्तको भवेत् ११ इत्यग्नयः समाख्याता लक्षयेद्बुद्धलक्षणः सदा समृवि-
शतिराख्याता पूजनार्थं द्विजेन तु १२ नानाकर्मणि तन्नाम प्रसंपूज्य प्रधाने प्रकृते च कुर्यात् क्वचिद्गु-
णे श्रमसूर्य्यादिग्रहाणाममन्नयोक्ता लग्नग्रहविलग्नभयात्कान्तिके च दोषो भवेदित्यनेन गतार्थत्वाद्वलोलि-
खिताः ५

॥

इति श्रीव्रजभूषणकृतग्रहयज्ञपद्धतौ ग्रहयज्ञविवेचनाख्यं प्रथमं प्रकरणम् समाप्तम् ॐ
अथ परिभाषा तत्रादौ कुशधारणं मार्कण्डेयः कुशपाणिः सदा तिष्ठेद्ब्राह्मणो दंभवर्जितः स नि-
त्यं हंति पापानि तूलराशिमिवानल इति वामे बहून्कुशान्दक्षिणे पाणौ च पवित्रं धारयेत् यत्नाचा-
र्यदर्शे संध्यादौ दक्षिणे पाणौ सपवित्रकुशत्रयमिति शाखान्तरविषयम् सद्यः सोपग्रहः कार्यो दक्षि-
णः सपवित्रक इति कात्यायनविरोधात् उपग्रहः पंचप्रभृतिः कुशाः पवित्रलक्षणं गृह्यपरिशिष्टे प्र-

१६

अनेन गर्भिणां साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति पवित्रनिर्माणं
पवित्रस्य इति मन्त्रेण होमे पवित्रधामेककमेव भवति शंखः ब्रह्मयज्ञेन पैत्रे च ब्रह्मग्रन्थिर्विधीय
त इति ब्रह्मग्रन्थिलक्षणं हेमाद्रिः संयम्य वेष्टनं मार्गे ब्रह्ममार्गविनिश्रिता सकृत्प्रदक्षिणीकृत्य
ब्रह्मग्रन्थिरुदाहृतेति सग्रन्थिपवित्रस्यायं विशेषः धृतपवित्रे कर्मान्ते ग्रन्थिमुत्कान्त तत्त्यजेत् विसृज्य
यदि पात्रेण पवित्रं विसृजेत्ततः प्राजापत्यं चरेत्कृच्छ्रं ततः किल्बिषविशुद्धय इति अत एव ब्रह्मग्रन्थिवि
मोक इति पद्धतिकारालेखः संगच्छते ततश्चाचमनं मार्कण्डेयपुराणे देवार्चनादिकर्माणि
तथा गुर्वभिवादनम् कुर्वीत सम्यगाचम्य प्रयतोपि सदा द्विज इति तच्च ब्राह्मतीर्थेन दक्षिणहस्तेन ।
दूर्वाभिमुखेन कार्यम् देवलः अथापः प्रथमातीर्थाद्दक्षिणात्त्रिः पिबेत्सममिति प्रथमाद्ब्राह्म्यात् ।
याज्ञवल्क्यः कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमादिति म
नुः उत्सितेवामहस्तस्याद्दक्षिणः स्यादकुन्त्विन इति गृह्यपरिशिष्टे यत्रोपदिश्यते कर्मकर्तुरंगं न तूच्य
ते दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः कर इति समसमत्वधानेनेत्यर्थः छन्दोगपरिशिष्टे यत्र दिङ्नि
यमो नास्ति स्नानदानादिकर्मसु तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्यापराजितेति ऐशानी चापराजिता तत्रै
व आसीनस्तद्वः प्रह्वो वा नियमो यत्र नेदृशः तदासीनेन कर्तव्यं न प्रह्वेण तिष्ठतेति रत्नावल्यां याम्यप्रत्यङ्
मुखेनेन कृतमाचमनं यदि प्रायश्चित्तं ततः कुर्यात्स्नानमाचमनं तथेति शाट्यायनिः दानमाचमनं ।

© Dharmartha Trust J&K. Digitized by eGangotri

होमंभोजनंदेवतार्चनं षोडशानैवेदानकुर्वीत स्वाध्यायपितृतर्पणं मिति तेनैवोक्तं षोडशपादलक्षणं
आसनारूढपादस्तु जान्वोर्वा जंघयोस्तथा कृताभिसक्थिको यस्तु प्रौढपादस्स उच्यत इति ततः प्राणा
यामः बृहस्पतिः प्राणानायम्य कुर्वीत सर्वकर्माणि संयत इति संयतो यतवाक् याज्ञवल्क्यः यदि
वाक्यमलोपः स्यात्जपादिषु कथंचन व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययमिति ततश्चाचमनं ।
आशार्के प्राणस्यायमनं कृत्वा आचमेत्प्रयतोपि सन्निति ततो विष्णुस्मरणं शंखचक्रधरं देवं द्विभु
जं पीतवाससम् आरंभे कर्मणां विप्रः पुण्डरीकं स्मरेद्धरिमिति वचनात् यत्तत्स्तोकोक्तविष्णुस्वरूपध्या
येदित्यर्थः पुण्डरीकं सूर्यमण्डलस्थितं विष्णुं ध्यायेत् ध्यानं सशंखचक्रं रविमण्डलस्थितं कुशेशयाक्रां
तमनंतमच्युतम् भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् इति फलेत्रिवि
धशुद्धिरित्युक्तं च अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यंतरः
शुचिरिति बाह्याभ्यंतरवस्त्रशुद्धिरिति त्रिधा शुद्धिः केचित्पुण्डरीकाक्षः धनात इति जलं सेचयेदिति
वदंति वामनपुराणे जपहोमोपवासेषु धौतवस्त्रधरो भवेत् अलंकृतः शुचिर्मौनी श्रद्धावान्विजि
तेन्द्रियः इति ततो द्विजः ॐतद्विष्णोरिति मंत्रं पठेत् ततः संकल्पः आरंभे कर्मणामिति विष्णुस्मरणो
त्तरमारंभविधानात् आरंभः संकल्पः आरंभो वर्णयत्ते संकल्पो व्रतशास्त्रयोः नांदीमुखे विवाहादौ ।
श्राद्धे पाकपरिक्रियेति वचनात् मार्कण्डेयः संकल्पविधिवत्कुर्यात्स्नानदानव्रतादिकमिति ।

© Dharmartha Trust J&K. Digitized by eGangotri

देवलः मासपक्षतिथीनां च निमित्तानां च सर्वशः। उल्लेखनमकुर्वाणो न तस्य फलभाग् भवेदिति
मासपक्षतिथीनां चैव यः प्रयोगाधिकरणभूताः सर्वेऽपि धर्मा नैकदिवससाध्ये कर्मणि प्रथमदिने
संकल्पकालिकां तिथिमधिकरणत्वेनोपादाय अमुकेनाहं यक्ष्य इत्यादि संकल्पे प्रयुञ्जते तन्न सम्यक् वादा
नामनन्वयायोगात् यत्त्वेकचित्तेन तेन रूपेणाप्रयोगे गतत्वाद्विहितानामेव मासादीनामुल्लेख इति।
तदर्पितमानाभावात् अविहितमासादिक आधानादौ वैकादशीव्रतादौ च मासाद्युल्लेखाभाव
प्रसंगाच्च अतो यारंभदिनाद्य तद्दिनानामेवोल्लेख इति स्मार्तैककर्मणि शुक्लो वा शुक्लपक्ष कृष्णपक्ष कृसं।
कल्पः श्रौतसकृदेव इति कमलाकरसहः इति कमलाकारोल्लेखितं यथा विवाहे गणपतिपूजने
पुण्याहवाचने षोडशमातृपूजने वसोर्धारायां नान्दीश्राद्धे ग्रहयागादौ पृथक्पृथक् संकल्प इति वे
नवायः यज्ञोपवीती हि धार्यः श्रौते स्मार्ते च कर्मणि तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते इति
छन्दोगपरिशिष्टे सदोपवीतिना भाव्यं सदा बद्धशिखेन च विशिखो व्युपवीती च यत्करोति न तत्कृ
तम्। कात्यायनः पित्र्यमंत्रानुद्रवण आत्मालंभेऽधमेक्षणे अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे
मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत् आत्मालंभो हृ
दयस्पर्शो मार्जारस्पर्शो मार्जारकर्तृकः स्वयंकृते स्नानकथनात् याज्ञवल्क्यः रौद्रपित्र्यासुरान्।
मंत्रांस्तथा वै चाभिचारकान् व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेदिति अन्यदाचरेदित्यने

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र·
घ·प·
१८
18

नेत्रकर्मसुज्ञावश्यावमननमितिबोध्यं गारुडे प्रणवादिनमोमंत्रवचनर्थ्योतेवसमम देवतायाः
स्वकेनाममूलमंत्रइदाहृतइति यस्मिन्मंत्रे प्रणवपठितः स्वाहाकारोभवेद्यदि स्वाहांतेनप्रयोक्ता।
योहोमेषुप्रणवादिकः यत्रस्यात्मस्त्वंशाबृः तेनैवहोमस्त्यंते प्रयोतेनत्रहोमंस्वाहाकारेपठेन
नः इदंकर्ममनेनेतिनकाचिदृश्यतेविधिः लिंगादेवेदमर्थत्वंयेषांतेमंत्रसंज्ञकाः मंत्रांतेकर्म
कर्तव्यंमंत्रस्यकरणत्वतइति टलपरिशिष्टे यत्रकुंरिकायांमंत्रविभागस्तत्रमंत्रांतेकर्मकुर्म।
थं तदभावेकंमक्रांतेक मकर्तव्यमितिव्यवस्था ४ तस्यांचगणानांवाः वसोममसेमेत्यनो मंत्रः श्रम
यामेवकादीनामपिकंडिकांतेमंत्रलापतिः विभावसोः स्वलितेपारमसीयइत्यस्या मंत्रत्वापसि
ॐममाहस्वाहे श्रवणानिमेलेश्रुद्धॐमंत्वपरिकल्पयेत् सौवर्णरजतेनाथ्रस्तम्पयेवापिकारये
त् ॐभाः योमाहेमनाराजतमवायताताश्रास्तमयावाश्रमेयाः रक्तापक्ताववर्जिनाक्रमसविकूरैविछि
द्राः स्वेलेलक्षणाश्चापियुक्ताः लक्षणमाह बाणेन ८ पुस्तवैगुल्याउन्नतोपोडशांगुलैः द्वादशांगुल
मूलाश्चतथावस्त्रंपुलासकाः पाषाणस्फोटरहितातथावस्त्रायलेकृताः इत्येवंकलशाःप्रोक्ता।
याभ्रोहाहादिकर्मसु पंचपल्लवामात्से आम्रजंहमधूकाव्यन्यग्रोधाश्वत्थप्लाविनो पल्लवाः
पंचपंचानामभिषेकार्थयुक्तमाइति इयोषध्यः कुष्ठमांसीहरिद्रेद्वेमुराशैलेयचंदने कर्चूरचं।
पकंमुस्तासर्वौषध्योदशास्मृताइति कुष्ठ १ कुष्ठ १ मांसी २ कउ २ द्वेहरिद्रेजलधीरदारुहलधीय

© Dharmartha Trust J&K. Digitized by eGangotri

मुरामांसी ६ शालपर्णीलीरा ७ चंदनं प्रसिद्धं ८ कर्पूरं कर्पूर ९ चंपकं प्रसिद्धं मुस्ता प्रस्या इति प्र
सिद्धं पंचमृदः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् राता: पंचमृदो ग्राह्याः सर्वोपद्र
वनाशका इति पंचरत्नानि वज्रमौक्तिकवैडूर्यं शंखपद्मरागेंद्रनीलको पंचरत्नानि प्रोक्तानि ना
रदेन महात्मनेति बह्वृचपरिशिष्टे अथातो बुधः सधूमेन जुहुयाद्यो हुताशने यजमानो भवेद्
धः सप्त इति वक्ष्यतीति इति तत्र धमने विशेषः साग्निश्रौतेनो यूधमे निरग्निर्व्यजनादिनेति अ
वेहोमं कश्चिन्नाग्राह्य कश्चिन्मंत्रेण स्वरूपेणैव भयं यत्र तत्र हवनं नामधेयेन इति यत्र स्वोक्त
मंत्रयोरभावस्तत्र नाममंत्रेण होम इति भावः स्वयं धौतेन कर्मण्या क्रिया सर्वा विप्रश्चिता न
त्वाजकधौतेन नाहतेनाप्यस्त्रवित्तः सकलार्थपात्रमविच्छेदं गृहीत्वाडंबरं पात्रं वा विसृज्याश्वत्थ
मुख इति अईवंरता प्रमधमिमर्थः रजतरौप्यादीनां निषिद्धत्वात्रैव अनो होमो वेदिकायां लोह
पात्रेषु वा भवेत् मृन्मये वाहृत्तत्कालेकेचिद्देवं समीरितमिति हस्तकृतेर्यनेनवत्क्रमिति यत्नस्य ति
द्धेः इति अथ नैमित्तिककाम्यसाधारणाः पूर्वांगभूतानि ह्याज्ञवल्क्यः आदौ विनायकं पूज्य ग्रहांश्चै
व विधानतः कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमामिति विधानत इति स्वस्तिवाचनादीनामु
पलक्षणं तथा हि गणपतिपूजनमादौ स्वस्तिपुण्याहवाचनेन ततः कार्यम् षोडशमातृसपर्याच
स्वधाराबंधमात्र पाठश्च नांदीश्राद्धं कार्यं बलिवैश्वं मंगलस्नानम् मांगल्ये खिलकर्मण्येतत्सा

© Dharmartha Trust J&K. Digitized by eGangotri

धारणांगानि २ ततः प्रधानं ग्रहयज्ञादिकर्म कार्यं तत्र मंडपवेदी कुंडरुद्रवेदीत्यग्निः कुंडं शीघ्रं च रूपाको
वसुधाराद्येतांयंगानि नियतानि ३ मंडपसंज्ञाविकृतकर्मः अविघ्नो मंडपस्थैव मातृणां स्थंजनं सहजत् ।
वैश्वदेवं वसोर्धारा नांदीश्राद्धं ततः परंमिति तयसिंहोपिकलसद्गुमात् । एतन्मंडपं वश्रमंडपस्थ करणेव
स्तते एतानि सर्वाणि स्वशाखागृह्योक्तविधिना कार्याणि शेषपरिशिष्टे कात्यायनः वन्हे स्वा स्वस
गृह्योक्तं यस्य यावत्कीर्तितं तस्य तावत शास्त्रार्थे कृते सर्वं कृतो भवेदिति शांतिहोमादिः तस्मात्
सर्वप्रयत्नेन स्वसूत्रेन विलंघयेत् येषां स्वसूत्राभावस्तेषामपि स्वशाखासंमतसूत्रोक्तमेव कर्म
भवति तथाचोक्तं आपस्तंबादिभिरपि स्वसूत्राभावतस्तथा बोधायनोक्तं कर्तव्यं सम्यक्याप्तितो
भवेदिति अत एव माध्यंदिनजाबालिगौधेयादिपंचदशशाखाभिः कात्यायनसूत्रोक्तं कर्म कार्यं
मंत्रपाठो पाभिः शुक्लयजुर्वेदीय एव कार्यः वशिष्ठः पारंपर्यगतो येषां वेदः सपरिबृंहणः तच्छा
खं कर्म कुर्वीत तच्छाखाध्ययनं तथेति माध्यंदिनीयादिभिर्बोधायनाद्युक्तं स्वविरुद्धं कर्म तैत्तिरीयमं
त्रपाठश्च न कार्यः याज्ञवल्क्यविरुद्धत्वात् तदुक्तिर्णत्वाच्च छंदोगपरिशिष्टे यमास्त्रानं स्वशाखायां पा
रक्यामविरोधियत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्मवदिति अत एव स्वशाखासंमतं पारा
क्रीयमघमर्षणादिवत्कार्यमेवेति ध्येयम् विरुद्धपरिकीयकरणे दोष उक्तः आश्वार्के अक्रिया
त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणां अक्रिया च परोक्ता च तृतीया चायथाक्रिया इति विरुद्धशाखीय

© Dharmartha Trust J&K. Digitized by eGangotri

वाजसनेयिनां तैत्तिरीयं याज्ञवल्क्योऽङ्गीरसात् संध्या प्रातर्वैश्वदेवं सत्यं चेति ऋग्वेदीयो मन्त्रः अथैव
तैत्तिरीयं माध्यन्दिनीयेनापठनीयं याज्ञवल्क्योऽङ्गीरसो नादिदेशके अतएवमाथर्वदिनीयनिबंधेषु तत्पाठो
न दृश्यते अघमर्षणं चतत्रद्रुपदादिवेति गीतायां श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्व
धर्मे निधनं श्रेयः परधर्मो भयावह इति पराशरः यः स्वशाखां परित्यज्य परशाखाश्रयमासमाश्रयं क
र्तुमिच्छति दुर्मेधा मोघं तस्य तत्कृतमिति मोहादन्यथाकरणे विशेषः यद्यन्मन्यथाकुर्याद्यदि
मोहात्कथंचन यतस्तदन्यथाभूतं तत एव समापयेदिति मोहादज्ञानात् कथंचन प्रमादात् अन्य
थाभूतं विपर्यस्तं तत्रैव समाप्तेर्यदि जानीयात् अथैतदन्यथाकृतं तावदेव पुनः कुर्यात् नावृत्तिः सर्व
कर्मणः प्रधानस्य क्रिया यत्र सांगं यत्क्रियते पुनः तदंगस्य क्रियायां नावृत्तिर्नैव तत्क्रियेति कामा
यनः कर्मयज्ञानन्तकालं प्रायश्चित्तमिति प्रायश्चित्तमाह पारस्करः कालातिक्रमे नियतवदिति
कालातिक्रमे सर्वेषु सामान्यप्रायश्चित्तहोमः सः सर्वत्र कार्यः प्रायश्चित्तानन्तरं विपर्यस्तं कर्म पु
नः कार्यं स्वस्य यज्ञोपवीतादेरकरणे विस्मरणमेव प्रायश्चित्तमिति वर्द्धमानः पितृकर्मण्य
येवं ततः पुनरावृत्तिः कृतस्य करणं नास्ति विना पितृक्रियां स्वगतिगारुडात् यातेष्वेवमेव उत्तरा
गमाह प्रयोगरत्ने पूजास्विष्टं नवाहुतयो बलिः पूर्णाहुतिस्तथा अपः संपादनं दानमभिषेको विस
र्जनमिति संप्रदायविदां वचनं प्रसाद्यं पूजेति स्थापितदेवानां पंचोपचारिकी स्विष्टमिति स्विष्ट।

© Dharmartha Trust J&K. Digitized by eGangotri


न्नाद्धोमः नवाहुत्यः भूराद्यितिसूत्रः प्रायश्चित्तसंज्ञकाः पंच प्राजापत्यं चेति। बलिः स्थापितदेवेभ्यः हरणं हु
तिः स्पष्टमेव श्रेयः संपादनं यजमानाय दानं दक्षिणादि अभिषेको यजमानस्यावभृथस्नानं च विस
र्जनं स्थापितग्रहाणामिति अयं चास्य प्रयोगो भविष्यति इत्यंगविवेचनम् मनोहरस्यानेकर्ममध्या
पिवा अयमसमावेतकर्मनतस्य कर्मफलं लभेदिति सत्यं नराय शूद्राणां नाममंत्रेण स्वक्तिमात्रेण सा।
र्वं कार्यमिति शूद्रकमलाकरे स्थितं अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरणमिति वेद
श्रवणे शूद्रस्य दोषश्रवणान्नरीयोपि च संस्कार्यो विनामंत्रेण मारिष नकेनचित्समसृजच्छंदसां
तेप्रजापतिरिति मनुवचनेन विवाहस्याप्यमंत्रकत्वविधानाच्च गणपतिपूजनादिचतुर्विधपाक
यज्ञकर्मविवाहादिपंचसूत्रमंडपे कार्यमन्यत्र गेहे सर्वकर्माते अर्थातः शालाकर्मेति सूत्रेण शाला
याकर्माधारार्थत्वात् पंचसूत्रबहिःशालायां कर्मेति कात्यायनाच्च बहिःशालामंडपेत्तिकर्कः त
न्नैव भवतीति शेषः तथा च विवाहादिपंचसूत्रमंडपे कर्म भवतीति सूत्रार्थः ते च विवाहे चूडाकरणे
उपनयने केशांतो सीमंतोन्नयन इति कात्यायनात्तेषां तथाहि चत्वारः पाकयज्ञाः भवंति हुतो
अहुतः प्रहुतः प्राशित इति हुतो होमः यथाग्न्याधाने होमः अहुतश्च होमः यथा स्थलारोहणं प्रहुतो।
होमो बलिहरणं च यथा पक्वादिः प्राशनमात्रे प्राशितः तत्र न होमो न बलिहरणं यथा सर्वासां पय
सि पायसं प्राशयित्वा ब्राह्मणान् भोजयेदिति तत्र एषु पंचसूत्रबहिःशालाकार्या अथ गणपतिस्थाप

© Dharmartha Trust J&K. Digitized by eGangotri

मार्थं मंडलेहरिभक्तिविलासे पंचरात्रे विदिग्गतत्वत्वक्प्रान्तिभिर्लावत्सकीर्तितं तस्यतावत्तस्यशास्त्रार्थे
कृतेसर्वंकृतोभवेदिति शेषांतिहेमाद्रिः तस्मात्सर्वप्रयत्नेनस्वस्तिकंनविलंघयेत् येषांस्वस्त्याभावा
स्तेषामपिस्वशाखोक्तंसमंतत्र्यंमोक्षमेवकर्मभवति तथाचोक्तं शापसंत्वादिभिरपिस्वस्त्याभावत
स्तथा वौधायनोक्तंकर्तव्यमसमर्थायपतितोभवेदिति, षोडशाधाएनः मा

का

र्जयेत्स्वस्तिकाः पीतासितसितारुणैरिति विदिग्गतानिचत्वारिको
णानिकृत्वाषोडशधाभित्वास्वस्तिकारंभद्राकारंमार्जयेत् अत्रचतुर्भि
र्भद्रं मार्जनार्थंवर्णमाहपीतासितसितारुणैः रिति पीतकृष्णश्वेतरक्तै
रित्यर्थः तत्रपंचवर्णरजोनिर्माणमाह पंचरात्रे रजांसिपंचवर्णानामं
डलार्थंहिकारयेत् शालितंडुलचूर्णेनशुक्लंवायवसंभवं रक्तंकुंकुमसिं



दूरगैरिकादिसमुद्भवम् हरितालोद्भवंपीतंरजनीसंभवंक्वचित् कृष्णंदग्धयवैकार्यंहरितंकृष्णपी
तकमिति पूजनंचात्रवारुणादिषोडशोपचारैः कार्यं आवाहनेविनादेवसन्निधेरभावेनपूजानैष्फल्या
त् प्रतिष्ठितदेवतापूजनमेवदशोपचाराः पंचोपचाराः तेषां षोडशोपचाराः स्मृत्यर्थेचारे आवाह
नासनेपाद्यमर्घ्यमाचनीयकम् स्नानमाचनवस्त्राचमनंचोपवीतकम् आचमनंगंधपुष्पेधूपंदी
पंचकल्पयेत् नैवेद्यंपुनराचमनंनत्वास्तुत्वाविसर्जयेत् आचमनपृथक्पुनरावृत्तिपतिशिष्टंषोडशोप

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
प॰प॰
२१

चारात्लाभेन्नपुण्यात्ततयैवैः क्रियेति अथ मंत्राः परिशिष्टे दोड्ग्रानेदे गणानांत्वा गणपतिं गणपतेः
ऊविं गणपव इति स्कंदस्याकृत्लेनस्तर्पयस्यपावकानः सरस्वत्याः अंबकमिति रुद्रस्य श्रीश्चेति श्रियइदं
विष्णुरिति विष्णोर्विनायादिस्व स्वलिंगाम्नातदेवतामंत्रः स्वयमूह्याः प्रयोगः प्रयोगेत्तेयः इति गणपति
पूजननिर्णयः अथ स्वस्तिपुण्याहवाचनम् तत्र परिशिष्टे कात्यायनः अथ स्वस्तिवाचनमृद्धिषु
मैत्रु ऋद्धिर्विवाहादावथ पन्यसंस्काराः प्रतिष्ठायागधनेष्वेते तत्कर्मणाम्नायंतयोः कुर्यादिति मेवेवा
मीनधिकादिनिमादिप्रयोगाः प्रयोगवत्सते शौनकः पुण्याहवाचनविधिं वक्ष्यामो यथाविधि
प्रयोक्तृकर्मणामादावंते चोदयसिद्धये आपः संशुद्धगंधमालाद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् काम्ये
कर्मणि मंगल्ये संग्रामेद्भुतदर्शने काम्येमांगल्ये पदाभ्यां नित्ये अतकृते पुण्याहवाचनाभाव इति
भावः भागवतेपि वकारजातकेकर्मवाचयित्वाच मंगलं परीहितस्येति शेषः मंगलं पुण्याह
वाचनमिति श्रीधरः कारिका पुण्याहाद्ये स्विरभ्यासे मंद्रमध्योच्चनिस्वनैः सोंकारं ब्राह्मणाः कुर्यात्
त्रिरोंकारेवतत्प्रियः इति तच्चय इति वेषणोपलक्षकम् शूद्रस्य स्वस्तिमात्रं इति शूद्रकमलाकरे श्रा
दिनास्वस्तिमहद्धिकल्याणशांतयोग्राह्याः इति स्वस्तिवाचने वाजसनेयिनां स्वल्पमेव माध्यंदिनीयैः
कार्यं एवमेव नृपनारायणकात्यायनहरिहरादयः जलोत्सर्गेप्येतावदेव वाजसनेयिनां स्वल्पमे
व पुण्याहवाचनमित्युक्तं तेनावतिकृतजातमंडलधारापातनमभिषेकाणांतत्रनिवृत्तिः कात्याय

© Dharmartha Trust J&K. Digitized by eGangotri

यते बृहत्सामिमादि पूर्वोक्तं यत्नस्वस्तिनः पयः पृथिव्यां ० विष्णोरराटं ० अग्निर्देवता ० द्यौः शान्ति रिति
मन्त्रैः मूलमन्त्रं इति स्वस्तिवाचनं अथ षोडशमातृपूजनम् छन्दोगपरिशिष्टे गौरी पद्मा शची मेधा सा
वित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया स
ह गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश पूज्यकार्येषु तु प्राग्वदेवाविधिरेव स इति मातरो
लोकमातरइति विशेष्यविशेषणं यदा तदा चतुर्दशत्वे षोडशत्वे प्रतिपाद स्वदा देवतान्तरं कल्प
नीयम् षोडशमातृपूजनादौ गणपतिपूजनं पुनः कार्यम् शूलपाणिमते आदौ गणेशः पूज्यः पश्चा
द्गौर्यादिकुलदेवतान्तं पूजयेत् तदुक्तम् आदौ विनायकः पूज्यः अन्ते च कुलदेवता इति श्रीपूजनमा
त्मदेवतेति पृथक् कुर्वन्तीति श्राद्धविवेकसम्मतो लवपुरीयशिष्टसमाचारः तत्र मूलमन्त्रं इति मा
तृपूजा अथ वसोर्धाराः ताश्च पञ्च सप्त वा कुड्यादिषु वसोः पवित्रमसीति मन्त्रेण घृतधारा नातिनीचा
नात्युच्छ्रिताः उत्तरसंख्याकार्याः ताश्च छन्दोगपरिशिष्टे कात्यायनः कुड्यलग्नां वसोर्धारां पञ्चधारां घृतेन तु
कारयेत्सप्तधारां वा नातिनीचां न चोच्छ्रिताम् आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पि
तृभ्यः स्तदनु श्राद्धदानमुपक्रमेदिति श्रीश्चलक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वतीति पञ्चधारापक्षे।
सप्तानां सप्तमे तानि वृत्तिः आयुष्याणीति विनाम महृदनिष्टं इति वसोर्धारा अथ नान्दीश्राद्धं षड्भ्यः पितृभ्यः
स्तदनु श्राद्धदानमुपक्रमेदिति कात्यायनात् स च द्विविधः सांकल्पिकः पिण्डप्रदानयुक्तश्चेति न

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र०
ग.प.
२२

न्नस्येकर्मणिबाधः महतितस्मिनद्वितीयः यद्वामांगपार्वणेद्विश्राद्धकरणेप्रशक्तस्यक्ता
ग्निस्यसंकल्पश्राद्धंकुर्यान् असक्तस्यव्याधादिनानत्कालस्येनतदुक्तंस्मृतिसंग्रहे अंगानिपित्र्य।
यज्ञस्यपदार्कर्त्तुंनशक्नुयात् संकल्पश्राद्धमेवासौकुर्यात्तदर्घ्यादिवर्जितमिति आदिशब्दादा
वाहनादिसंग्रहः तद्वाहहायनस्तवः संकल्पश्राद्धेर्घ्यावाहनासौकरणंपिंडस्वधावाचनानिवर्जये
दितियामेपियत्कात्यायनपार्वणेनेवनेकोद्दिष्टंसपिंडनंयत्तत्कात्यायनेस्वपिंडत्यक्तं तत्संकल्पभोजये
दितित्कात्यायनेनोक्तिकादिनात्स्पष्टमेवेति छागलेयः अग्नौकरणमर्घ्यंचावाहनंचावनेजनम्
पिंडश्राद्धेप्रकुर्वीतपिंडहीनेनिवर्तते इतिभविष्ये पिंडनिर्वपनंकुर्यान्नवाकुर्याद्विचक्षणः इति न
चसांकल्पकस्यप्रकारोविधीयते प्रयोगानुवचनस्यायात् द्वितीयस्यानुपद्धतिः सर्वत्रैवकात्यायनो
क्तापद्धतिर्क्वचित्सर्वत्रदैवत्यः नवदैवत्यादपिभवत्येवमातृतंत्रपविभागात् सांकल्पिकश्राद्ध
णविस्तारेणनकार्यः तथाचछागलेयः एकैकस्यचसर्वस्यद्वौविप्रौतुसमन्वयेत् विश्वेदेवौतथा
द्वौचनतयसज्येतविस्तरं एकैकस्यत्रिकस्यसर्वस्यद्वौद्वौविश्वेदेवाद्धाविनियुक्ताविनियर्थः अन्येपेत्रेपि
याद्रःमुद्धोविप्राः भविष्यविष्णुषः पूर्वाह्नेभोजयेद्विप्रानष्टौसर्वेषुदक्षिणं तथाचनवमेविप्रेचतुर
स्त्रेवेगेस्वर इति अत्रयथापार्वणेदोवामक्रमेणमंडलादिक्रियतेतथा नकार्यंकिंतुसर्वेषदत्ति
णकार्यमित्यर्थः चतुरस्त्रेइति चतुरस्त्रेमंडलेपायायर्घ्यक्रियमाणेयोःत्तिष्ठिगाक्षेतनवमेभोज।

© Dharmartha Trust J&K. Digitized by eGangotri

येदवधूपमिमर्थः प्राग्ये तिलार्थन्तु यवैः कार्थं सव्येनैवान्नपूर्वकः । छन्दोगपरिशिष्टे स्वाहाकारवषट्
कारनमस्काराः दिवौकसामिति अत्रेयं व्यवस्था देवहविर्दाने स्वाहा वस्मादिदाने वनमो वषडिति
वल्लाडे स्वाहाशब्दं प्रयुञ्जीत स्वधाख्याने च बुद्धिमान् वृद्धिश्राद्धे सदा सम्यग्यत्न संत्र वकारयेत् कुशा।
स्थाने च दर्वी स्युर्मंगलस्याभिवृद्धये प्राङ्मुखो देवतीर्थेन वृद्धौ प्रतिचरेत् पितॄन् सव्येनैवोपवीतेन
तिलैश्च विवर्जितं नान्दीश्राद्धे दैवकृत्येन नमः स्यात् क्रमः स्वाहेति प्रयोगः इति छन्दोगपरिशिष्टे मा
तरामंत्रितान् विप्रान् युग्मान् भयन्तस्तथेति अत्र विप्राभावे स्त्रियोऽपि भोज्याः तदुक्तं वृद्धवशिष्ठेन
मातृश्राद्धे तु विप्राणां मलाभे पूजयेदपि पतिपुत्रान्विता भव्या योषितोऽष्टौ कुलोद्भवा इति ॥ प्रपञ्च
सारे एवं स्त्रीणामपि सामान्यं वृद्धिश्राद्धं न सर्वदा नमस्कारेण मंत्रेण कुर्यादुद्वाहे वा द्विजैर्बुधः जीवन्मातृ।
पितृमातामहानां न पार्वणे गौतमः पितृवर्गो मातृवर्गो वर्गो मातामहस्य च जीवन्त यद्धि वर्गाग्रं संतत
वर्गो परित्यजेदिति शालंकायनविषये पूर्वसत्त्वे परेण मसहत्वयेदिति विप्रविरोधात् प्रयाणे स[illegible]
बन्धेन नान्दीश्राद्धे न भवतीति प्रतिबन्धकसंभावनायामवधिः एकविंशाहः पूर्वं तेविवाहे दशवासराः
मेहे चौपनयने नान्दीश्राद्धावधिः स्मृता इति अधिकं विवाहपद्धतिविवरणे द्रष्टव्यं इति नान्दीश्राद्धम्
ततो बलिवैश्वदेवकर्म वैश्वदेवं च नान्दीश्राद्धे मातृपूजनात् पूर्वमेव कार्यं कर्मान्तरत्वात् तथाह शा
ट्यायनः श्राद्धे च होमे हानाय वा नैमित्तिके श्राद्धे तु पार्वणे एकोद्दिष्टे निवृत्ते तु वैश्वदेवं विधीयते इति तथा।

© Dharmartha Trust J&K. Digitized by eGangotri

चेति तथैवैतत्कर्त्तव्येते सर्वं कृत्वा सपिंडनांते कार्यमित्यर्थः शिष्टाचारोप्येवं केचित्तु नांदीश्राद्धं ज्ञाने।
ते कुर्वंति वत्तर्विश्रान्तिमते श्रोधमत्रमनुनाथ्यैवैश्वदेवक्रियांततः श्राद्धं हि श्राद्धशेषेण वैश्वदेवं स।
माचरेत् दैवमेरुयवैदिकाविरुद्धविशिष्टनैमित्तिककर्मनैमित्तिककर्मनिमित्तकनांदीश्राद्धपरे श्र
विश्वामेरुयश्चैवमातॄणां पूजनं सकृत वैश्वदेवं वसोर्द्धारा नांदीश्राद्धमतः परम् मितिकल्पतरुमात्तु।
क्रमबाधाविरोधात्कल्पतरुमातृप्रयोगविरोधाच्चमेरुयमातॄणां पूजनं सकृत गोर्ष्यादिपूजनसमये।
कार्यं वैश्वदेवम् प्रयोगः प्रयोगे इति बलिवैश्वकर्म अथ मंगलस्नाने मार्कंडेयः शिरः स्नातः
सकुर्वीत दैवं पित्र्यमथापि वा याज्ञवल्क्योद्दिष्टश्रुत्वा वापि स्मृत्यर्थकर्म च कारयेदिति अपरार्के गोरस
र्षपकल्केन साज्येनोत्सादितस्य च सर्वौषधैः सर्वगंधैः विलिप्तशिरसस्तथा इति भविष्ये सर्वगंधि
तैललिप्तस्य स्नानं कोष्णेन वारिणा महास्नानोपविष्टस्य स्वस्ति वाचयेद्द्विजैस्तदा इदं मांगलिकस्नानं
कर्मारंभेषु शस्यते इति वृद्धगार्ग्यपरिशिष्टे कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चंदने वचा (चंप) चंपकमुस्ता च
सर्वौषध्यो गणाः स्मृताः आस्यंगमेमान्नत्रग्रात्ये कात्यायनः वदंते उज्ज्मदर्पः कर्पूरं च समांशकं
सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभमिति इदं मंगलस्नानमारंभदिनात्प्राक् निषिद्धदिनेपि संक
ल्पपूर्वकं कार्यमिति जपसिद्धीपकल्पतरुमेस्थितम् नत्र विवाहे नांदीश्राद्धात्पूर्वदिवसे नैव रणादि
नात्पूर्वदिने यत्कर्माणि प्रतिसांसकल्पात्पूर्वदिने यजमानेन समंत्रेनस्नात्वा सर्वमेवंकार्यम् आरंभः।

© Dharmartha Trust J&K. Digitized by eGangotri

म५

आरंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेतिवचनात्अंगेदाः
यतःसंभोर्हेकः अहोमकःसर्वइतिविवेकः प्रयोगःप्रयोगे इतिमंगलस्नानं अथप्रतितिथामास
पक्षतिथीनांचनिमित्तानांचसर्वशःउल्लेखनमकुर्वाणोनतस्यफलभाग्भवेदितिदेवलवचनात्
ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधस्मृतःइतिभगवद्वचनात् काम्यंशर्वंचसर्वांगसंकल्पेनैवजा
यतइतिस्मृत्यंतरात्सप्रपंचोऽत्रहरिहरार्चनचंद्रिकायांद्रष्टव्यः इतिप्रतिज्ञा अथपंचगव्यप्रयोगस्त
त्रसर्वतःपंचगव्येनप्रोक्षयेद्यागमंडपं आपोहिष्ठास्वैनैवततःस्वस्वपदेनपठेत् स्वस्तायुनमंत्रस्व
स्तिनइंद्रःपयःपृथिव्यामितिमंत्रद्वयात्मकंपठेदितितत्रैवलिखितं गायत्र्यादायगोमूत्रंगंधद्वारे
तिगोमयं आप्यायस्वेतिचक्षीरंदधिक्राव्णोतिवैदधि तेजोसिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकम्
गोमूत्रेमाषकास्त्वष्टौगोमयस्यतुषोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्तिताः गोमूत्रवच्च
तस्येष्टास्तदर्धंतुकुशोदकमिति गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं निर्दिष्टंपंचगव्यंतुपवित्रं
कायशोधनमिति अथसर्षपविकरणम् वेदमंत्रैश्चकर्तव्यारक्षाश्वेतैश्चसर्षपैः कृत्वापोट्टलिकां
चैवबध्नीयाद्दक्षिणेकरे इतिप्रयोगप्रयोगे इतिसर्षपविकरणं ततःआचार्यादिवरणम् ग्रहय।
नैवैक आचार्यएकोवसनावत्वारऋत्विजः अथवापकस्त्विकु तथाचोक्तम् नवग्रहमुखेकुर्यात्
ऋत्विजश्चतुरःशुभान् अथवाप्येकमभ्यर्च्यब्राह्मणंविधिनामहेइति तथाचार्यनिर्णयः सर्वत्राचार्य

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
प॰प॰
२८

24

स्त्वयजमानस्य समशाखीय एव अस्य यायजमानस्यशाखीया आचार्यस्य स्वाध्ययनाभावेन दीयपदार्थो
नातिर्वाह एव तस्मात् आचार्यशाखीयैवानुष्ठानेनैव गृह्यं तथा च पराशरः यः स्वशाखीयं परित्यज्य
परशाखीयं समाश्रयेत् श्रियमाणं समंधं कृत्वा सोंधेतमसि मज्जति इति ऋत्विजस्तु भिन्नशाखीया अपि।
गृह्यागादन्यत्रमासे शुभास्तु आस्य होतारोद्गातारपालास्तथाष्टैव अष्टौ तु जापकाः कार्या ब्राह्मणा वे
दपारगाः सर्वलक्षणसंपूर्णा मन्त्रविद्विजितेन्द्रियाः कुलशीलसमायुक्तः स्थापकः स्याद्द्विजोत्तमः।
स्थापकस्याचार्यः दक्षिणेव समस्तानामाचार्यो द्विगुणो भवेत् सर्वेष्वेते मधुपर्केण पूज्याः तथा च का
त्यायनः षडर्घ्या भवन्ति आचार्यो ऋत्विग्वैवाह्यो राजा प्रियस्नातक इति ऋत्विजो वृत्वा मधुपर्कमा
हरेदिति आश्वलायनोक्तेश्च संपूज्य मधुपर्केण वैदिकं कर्म कारयेत् अपूज्य कारयेत्कर्म्म किल्बिषी।
वयुज्यते इति विश्वामित्रोक्तेः यज्ञऋत्विक्परशाखीयं कर्म करोति तच्छाखोक्तेन प्रकारेण तं मधुपर्कं
कारयेदिति उक्तेश्च तत्तद्देशोक्तविधिना विष्टरादिग्रहणं तत इति हेमाद्रिकारणाः कार्याः पञ्चविंशति ऋ।
त्विज इति केचिद्यजमानशाखोक्तेनेति विधिनेति वदन्ति मधुपर्कप्रकारो वक्ष्यते अथाचार्यवरणम्
तच्च मंडपप्रवेशसमये कार्यम् तत्रैव ब्रह्मवरणम् केचिद्ब्रह्मवरणं कृत्वा आचार्यवरणम् कुर्वन्ति
ऋत्विग्वरणं तु पुण्याहवाचनोत्तरकर्म्माणि शिष्टाचारादेवं केचिदाचार्यवरणं मंडपारंभसमये
ऋत्विग्वरणं पुण्याहवाचनोत्तरम् ब्रह्मवरणं कुशंडिकादौ यज्ञऋत्विग्वरणानन्तरं पुण्याहवाचने

© Dharmartha Trust J&K. Digitized by eGangotri

नगुरुणाहत्वाचनैतेषामेवाधिकारः अन्येषांनैरेषामितिसंप्रदायः अथवरणसामग्रीलिंगवृ
णं वस्त्रयुग्मंतथापूर्वंकेशरंकर्णभूषणं अंगुलीभूषणंचैवप्रमाणाबंधस्यभूषणं कंठाभरणं च।
कानिआरंभेधर्मकर्मणः आचार्यायतथादत्वा अलिंगमस्यापिदापयेदिति आपः पूर्यंते॰ स्निग्धम
पात्रंजलपात्रं कमंडलुरित्यर्थः ततोजापकवरणम् तेचत्वारःश्रुतिरूपनामायणादयः अश्वाविति
कल्पतरुः वरणसामग्री भाजनंभाजनमाधारःशंखोपानककमंडलु आसनेनवमनमुद्राकर्णभूषणाय
वीतिकं एतद्दशविधंदेयंपदंवरणसिद्धये एताभावयंचैदेयंपात्रंवस्त्रांगुलीयकं तदभावेषतो
हलेदत्वाकंचित्यकल्पयेत् यंकंचिद्दात्वाधारादिकंप्रकल्पयेन्नदत्वाप्रकल्पयेत्तद्विक्रमित्यर्थः अथ
विनियोगादिप्रसंगात्कात्यायनः इष्टाः स्मृतयः स्मर्त्तारः परमेष्ठ्यादयोदेवतामंत्रोंतर्भूतास्त्रम्मादि
कार्हविर्भाजः स्तुतिभाजोवान्तः शास्त्राश्चम्योपवेषकपालेभ्यो मूषलादयश्चप्रतिमाभूताश्चदेशसि
गायमादीनेतान्प्रविदित्वायोधीतेनुब्रूतेजपतिजुहोतियजतेयाजयतेतस्यब्रह्मनिर्वीर्यंयातयाम
भवस्यांतराश्चगर्तंवापद्यतेस्थाणुंवर्च्छतिप्रमीयतेवापापीयान्भवत्यथविदित्वैतानियोधीतेतस्य
वीर्यवदथयोर्थविन्तस्यवीर्यवत्तरंभवतिजपित्वाहुत्वेष्टातत्फलेनयुज्यतइति एतेविनियोगातकथ
नेचवरणंतोगमासादि आर्षेत्राह्मणोवेल्लयमादेशोनाधिकस्त्रगमासादिमहावैदिकविधिरिति
इत्यकर्मस्वविशेषः हलमहीपे नवग्रहस्थेदेवः आदेवतानिकेमतेब्रह्मलयतेतद्वंतद्धियनता।

© Dharmartha Trust J&K. Digitized by eGangotri


ग्र०
प०प०
२५

पिण्डीति ग्राहेद्यस्यवेनेनपित्रकर्माणीति वोत्वेत्थोविमलेजलेशति इति श्रीव्रजध्यवेनानिकेप्रवेशप
वेन शृलोक्तकर्मस्वपितकथनाभावः भूपणादिवर्चितायोग्रहपत्तपद्धतौ श्रीव्रतविवेककारणम् २
कारिकाः सलिलान्तह्रस्तामन्त्रोभूमोपमतिवद्धविः सत्तेयावारुणोभागःस्य मंरुपकोसुधा स्तभा
स्तुसारमवेदाक्रमवाःप्रशस्ताःवेणवद्ववाःक्रमुकनामस्तनेवोदफाख्य श्रमेपिनिदितनक्रमभवाः।
समानाःस्तुःपंचहस्तविमताश्चविःसमतास्तु १ वेदिकोणागदितायुगा ४ सख्याः श्रेष्ठमेरुपटलप्र
मितोक्ताः श्रेष्ठपवनकनिष्ठमध्यपोरष्टहस्तविमतासचूरकाः २ भूमिंमेरुपमध्यगां सवलवान्
कृत्वाचतस्रिगुणौरारभ्याग्निदिशंस्वेनैनिखिलकोष्ठास्तेगार्गक्रमात स्तंभातां ५ प्रमितांस्तंभे
ववन्तुरोमध्येयगर्भक्रमानस्तंभाषोडशशरोपयेदृढतंयथाग्रक्रमागोबुधः २ दत्वाकाष्ठचतुष्टयं।
समर्मितिर्यांतहृयेच्छिद्रवत्मध्यस्तंभशिवाभ्रुतिर्यगपरंस्तंभेष्ववायेषपि शीर्षाणिशीर्षाणिदिशोदिशे
यतितथाकाष्ठानिकर्णोहिनाकोणोदोचतथापराणिशिखराकारंचमध्येचरेत ४ कनिष्ठमध्ये
नमंरुपेश्रुहाराणिचत्वारिदिग्गताणि गजाधिभिर्नैत्रशोभैस्तथागवाणाःक्रमादेपुलिकेभवेति ४
नालिकेलिदलैःस्वपलवैःवेणुभिःश्रुमकैश्चसंभवे हारवर्जमभितस्तथोपरिष्टाद्देयदीविला।
मंरुपंबुधीरिति नल्वायाविंशतिहस्तपरमितमेवमंरुपः नावहस्तःकिलमंरुपस्वलायामितिवचना
त तचषोडशहस्तमंरुपसामग्री स्वनितेत्र १ प्राणामस्त्रेयावदपेक्षितं यत्तोपसारदारुजकाष्ठानि। ५

25

© Dharmartha Trust J&K. Digitized by eGangotri

तदभावेवेणव: तत्रमेध्यस्तंभवत्रप्रथमष्टाष्टहस्तोच्चंसमूलेनयावास्तंभद्वाघाकेसमूलेपंच
पंचहस्तोच्चम् वर्तुलतावृद्धादशाद
शांगुलसूत्रमितासर्वेषामंतर्वास्य।
स्मात् उत्तमेचवहिगुणेति विस्तारा
शिसिष्यास्तेस्तूपोपरिसूत्रेणनवावि
क्रमन्स्परतितैव प्रतर्कोणावदति
त्वेनतंस्थूणाशेपणांचाग्नेयकोणत:
मन्यस्थानेकार्यम् मध्यस्तंभोपरि
ततकाष्ठानिशान्यसच्छिद्राणिचवारि
वास्तंभोपरिकाष्ठानिधान्यसच्छिद्र
णि द्वादशायावदर्पेलितानि मंडपवा
स्वद्वारतनकाष्ठानि द्वाविंशान् यावद
स्तनाधिकारस्तु:पाशयुगान्विता:निया
दितावावालतलोद्भवा १ अगलेविवि



© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
प॰द॰
२९

धं त्वत्र योक्तं मात्रांगादिभेदतः मात्रांगुलेन यामुष्टांगुलदेहजमेव च २ मध्यांगुले मध्यमपर्वदैर्घ्यमा
नेन मात्रांगुलमुत्तमं स्यात् पादोनमेतद्विहितं च मध्यमं पर्वार्द्धमानेन त्वधमन्तु ननस्मृतं तु म २ आ
चार्यहस्तस्य कनिष्ठिकायाः स्थानत्रयं येंगुष्ठविवर्जितेषुः बद्धस्य मुष्टेस्त्वथ तुरीयभागो मुष्टांगुलं यो
क्तमिहाभियुक्तैः आचार्यपादेन समज्यमानो ग्राह्यः दानवावनालारमणाव च व च तमप्रमाणे।
प्रयुज्यमाने प्रतीपादिति कामायवत्तानुरोधात् यत्तु कस्माद्धस्तेन निगोभिलसूत्रंनक्का खातरवि।
घंमं पूर्वकामायनहिरोधात् समस्थिते वाप्रदेशकिर्तिवाप्रसर्हईवाहोदग्रामो विभागः नद्दा।
दशांशाः कतिसन्त्र मुख्यैः योक्तं तथा देजहस्मंगुलेन ५ जिनांगुले २५ हस्त्रहस्त्रदिष्टो रत्निः कल
शोनितहस्त एव वर्षेण्द्राहीनस्त्व सपावरत्निः स्त्रिष्टिस्प्रर्वे गदितो महद्भिः ८ आगमे सप्तादेमंड
पेचैवमात्रांगुलमुद्दीरितम् मात्रांगुलादित्रितयं कंडेग्राह्यं यथामति ७ श्रोतेविशेषः अथाप
रोत्रकृतिमूलकरसेकामाघनोकेवलदेहलब्धं अतस्तदेवाग्रयणीयमेवनकल्पवाप्यागम।
वाधितंचेतिदिक् इतिमानंत्रतेवेव वसु ८ नव ९ दश १० हस्तामंडपाःस्युःकनिष्टारवि १२ मनु १४
तिथि १५ हस्ताम ध्यमास्त्रि प्रदिष्टा रूप १६ धृति १८ नवेवहा २४ हस्ताःप्रधानमास्त्रिसममसमचा।
तुरस्त्रामंडपेभवन्ति ९ अथ मंडपनिर्माणप्रकारः वसिष्ठः नित्यनैमित्तिकेकाम्ये प्रमत्सर्वेसमं।
डपमिति अथ्यकाम्यमित्यर्थः मात्स्ये गृहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः रुद्रायतनभूमौ वा


२६

© Dharmartha Trust J&K. Digitized by eGangotri


वृत्तरत्नमुद्रकूलवम् तस्य द्वाराणि चत्वारि कर्तव्यानि विचक्षणैरिति तत्र माध्ये द्वितीयानां
यह्योक्तकर्मसु विवाहचूडाकरणोपनयनसीमन्तकेशान्तेति पंचस्वेव मंडपनियमः पंचस्व
बहिः शालायामिति निरूप्यत्वात् गृह्यसिद्धस्मृतिप्रमाणाद्युक्तेषु शान्तिकपौष्टिकादौ त्वनियमः स्थ
वेदिकाशालासु तावद्दोषशनाननदहनादिभिर्भूमिं संशोध्य प्राचीं निश्चित्य जलेन समभूमिं
कृत्वा तत्र यजमानहस्तेनाष्टापंचकरोदरसहस्तं मंडपनिवेशायोग्यं चतुरस्रं चत्वरं निर्माय मं
डपं रचयेत् स च त्रिविधः कनिष्ठमध्यमोत्तमभेदात् ऊरुमानेन मंडपकोष्ठपादौ यद्वै जलेने
वभुवेत्स मंडलं यथा तथा नैव कदाचनात्मनः अर्घाजलेनैव ततः समत्वं नैव कुर्यात् यद्यवास्तुषू
जने ॥ केचिद्वास्तुपूजनेन मंडपपूजनानेनाऽर्कविंति तन्मूलानन्यथाधिका भवति यास कृष्यमाणा
नवश्लक्ष्णादरोमशाकर्कशाक्रूरशाम्यपि वेणावाबाल्वजी यद्वाम्बुजशणोऽश्वांगुलिदलस्थलो
कमानानि मंडपमध्यकाष्ठानि वायव्यकोणकाद्दलकाष्ठानि चत्वारि यावद्धेपलिप्तानि वेदि
काकाद्दनकाष्ठानि कोणकाष्ठानि च यावद्देपलिप्तानि पञ्चभिः ॥ कोष्ठसशिखिवर्मंडपं विद
ध्यात् स्तंभपंचमांशेन सर्वत्र गर्तो विधेयः अथ वेदिः वेदिर्मंडपमध्यकोष्ठविमता हस्तप्र
माणाकूपाराम ध्यहस्त्याकृद्दविमतेवांशे भवेन्नतामध्ये दर्पणासन्निभा समतमाष्टाहस्ता
स्तयाध्यानयाप्रकायक समेत्रिकाभिरथवाउलाभिसद्धामेदरा ॥ सामामेमाकौ वेदिकेयप्रदिष्टा

© Dharmartha Trust J&K. Digitized by eGangotri

वारामादौ पद्मिनीपद्मतस्या विंशाग्रस्ताश्रीधरीस्या
द्विवाहेराजं पद्देस्यात्समद्रासमद्देति मंडपमध्येचव



हस्तमिताचव
स्याहस्तोच्छ्रिता
वेदिकार्याम
हावेदिरियंश्र
मासर्वावेदि
काहस्तहस्त
प्रमिताकार्या
वस्तंनस्तंभेः



पमध्येवेदिमंडपरत्नौयांशेनकार्यामध्येवेयाश्वनारिस्तंभानिमंडपाईप्रमाणानिवाह्यस्तंभा
निमंरपरत्नीयभागतस्यानि नडपविवलिकाकाष्ठानिश्रमानिकादनकोणकाष्ठानिशिवे
रकाष्ठानिवेदिकाकाष्ठानिस्वकुष्ठायथासंभवतःकार्याणि प्रथद्वाराणि स्तंतोइवरवोधि
वृत्तवदगाः सर्वादिदिक्तमाद्वायोयांत्यविपर्येयणगदिताचायांत्यचापर्यतः पश्चमेकता।

© Dharmartha Trust J&K. Digitized by eGangotri

गङ्गवास्तसकलालाभेशमीजाघवाजंतूखादिरनालकाम्यनमज्ञास्तेषामभावेशुभाः निर्व्रिदाः
सनवः समाहतनवसूत्रलिनाः सनवः शाखोपवरमाहहस्तविमिताः खोस्यगुलैर्बन्लाः हा
रेभ्योवहिर्वहस्तविमितेदेशेनिखेयावृधेद्धावंर्यवृनभागतोगुगलशाहीनादिकेष्वक्रमात्
तिर्यक्कदिहस्तायतिकानिहस्तपादाहंहस्तामधमादिकेषु शोस्यद्वियविदगुलानिदर्घ्यादैर्घ्यं
इमानामयवाशिखोस्य सर्वेसवेमृदूतिखेयंखेक्रमागादंतुजानिखनरोस्तुतेषां दशंगुलेर्हि
दशाभिर्युगास्त्रैर्वद्रांगुलैःसाहद्युगैःशैवी शैवैमूलंवंयस्मान्नितिरिशासुभयपासयोर्मध्यदे
शेवैकैकमध्यसूत्रगासक्तगादिनमघेयावक्रमस्यहत्त्वयत तेहैर्ध्यंचांगुलैस्सानवभिरथमेवरामचैद्रः
कस्मात्तुयामोवेदांग्रानःसावृवटनिखेमनेद्विग्विवेदांगुलैस्तु सफलदलसप्तैर्वीतिकेलिंडुमो
स्येःकसुकनरुभवेर्वाकाद्लेर्दर्पणेण्स्य विविधवसनवंधस्नामेर्चंरिकाभिर्विविधरचितभोर
भूषयेत्सर्वेशगान वेदादोपे स्नामेनःपहृकूलैःपौष्पैस्तगाभिर्दर्पणैर्चैरिकाभिः मधैः खोथैःसस्क
लैर्धृविभेदैर्धूपांउर्यांमेडपेपल्लवैस्वीति स्वर्याथतिकूर्पः सर्वेद्रारतोरणादेहलीकाष्ठादिलहा
स्तेउड्ढेवरहृतेदालिंगस्ययक्तेनपश्चिमे यटहृतउलं विस्युयागादोषोखोदीन शिवयाग
त्रिष्ठलान गृहयागःशिवयागः स्वयन्त्संवैसोकालिवाछविधेयम् इतिमंडपनिर्माणं स्वकुं
निर्माणम् नवमध्येवतरस्त्रकउं कुंडनमध्यभागेतकारयेच्चनरस्तकम् वितस्तिहयखोनंचकुं

© Dharmartha Trust J&K. Digitized by eGangotri

ऽस्य चत्वारिंगुलम् विस्तारेणात्त्रिभागेन तदङ्गुलित्रयसंयुतम् वैश्यानां द्व्यङ्गुलाधिकं शूद्राणां हस्त
मात्रकमिति नवग्रहयागेऽप्येवमेव कुण्डं कार्यम् कोटिहोमे नवग्रहमखे कुण्डं हस्तमात्रं समं भवेत् चत्व
रस्त्रमधोहस्तं योनिवक्त्रं समेखलं केचिन्मेखलात्रयं कुर्वन्ति मेखलाभिः सहवर्तत इति समेखला
मिति समासात् तत्र संहितायामनेककार्यप्रसङ्गे योनिरेव वक्त्रम् यस्य तद्योनिवक्त्रं समेख
लमिति मेखलया सह वर्तत इति समेखलं तेनैव चत्वारिंशदङ्गुलविस्तारा मेखला तदूर्ध्वं स्थितेति मा
त्स्ये वितस्तिमात्रा योनिः स्यात् षट्संख्याङ्गुलिविस्तृता कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चाङ्गुलोच्छ्रि
ता गजोष्ठसदृशी तद्वदायता छिद्रसंयुता: मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा गजोष्ठत
साश्वत्थदलवत्सा वेति विकल्पः सा योनिः पश्चिमे कार्या गर्गः पश्चिमे मध्यभागे तु योनिं कु
र्याद्विधानतः इति वृद्धवसिष्ठोऽपि योनिश्च पश्चिमे भागे प्राङ्मुखी मध्यसंस्थिता षडङ्गुलैश्च वि
स्तीर्णा चायता द्वादशाङ्गुलैः पृष्ठोन्नतायता सैव सच्छिद्रा मध्यमोन्नता एवंलक्षणसंयुक्तं कुण्ड
मिष्टार्थसिद्धये इति मात्स्ये मानहीनाधिकं कुण्डमनेकभयदं भवेत् तस्योन्नतपूर्वेण स्थण्डिलं
हस्तमात्रकम् त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रायसंमिते स्थण्डिले वेदिः वप्रो मेखला द्व्यङ्गुलो
च्छ्रितो वप्रः प्रथमः परिकीर्तितः त्र्यङ्गुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि द्व्यङ्गुलं तत्र विस्तारः
सर्वेषां कथितो बुधैरिति अथ ग्रहवेदीमाह गोभिलः कुण्डस्य प्रागुदीच्यां वा मध्यां वास्त्रतोऽपि

© Dharmartha Trust J&K. Digitized by eGangotri

वा चतुरस्रं चतुर्हस्तं कर्तव्यं ग्रहयज्ञे एकमिति वृद्धवशिष्ठोपि कुंडस्य ईशानभागे तु ग्रहवेदीं प्रकल्पये
त् हस्तोन्नतां च विस्तीर्णां चतुरस्रां समंततः इति शांतिकर्मादौ प्रधानदेवतास्थापनार्थं सर्वत्र वेदि
का कार्येति दिक् उत्तमा नवकुंडी स्यात् पंचकुंडी तु मध्यमा एककुंडं त्वधमा शौनकः कश्चिन्मासस्य
चोच्चलादिति नित्यहोमे च दीक्षायां देवतास्थापने तथा शांतौ पुष्टौ च साहस्रे होमे कुंडं तु करात्मक
मिति कुंडमंडपसिद्धौ च शतार्धे रत्निमात्रम् शते बाहुरत्निमात्रं सहस्रे रत्निमात्रं सहस्रे हस्त
मात्रं अयुते द्विहस्तमात्रं लक्षे चतुर्हस्तम् कोटौ चाष्टहस्तमिति प्रत्नलक्षे द्विहस्तमात्रमिति तु
नरांतहोमश्चापरस्तेषु ग्रहयागादयस्तत्र यागे नवकुंड्यादि विधानं तत्र प्राच्यां चतुरस्रं आग्ने
य्यां योन्याकारं याम्ये अर्धचंद्राकारं नैरृत्ये त्र्यस्रं वारुण्यां वृत्तं वायव्ये षडस्रं उत्तरे पद्माकारं ईशान्ये
अष्टास्रं शांत्येशानमध्ये नवमं आचार्यकुंडं चतुरस्रं कार्यं कामनाविशेषे कुंडविशेषः प्रागद्या
यां सिद्धिः १ पुत्रः २ शुभं ३ शत्रुनाशः ४ शांतिः ५ मारणच्छेदनौ ६ वृष्टिः ७ आरोग्यं पश्चिमादिदि
क्क्रमेणेत्येषाम् ब्राह्मणानां चतुरस्रं क्षत्रियाणां वृत्तं वैश्यानामर्धचंद्रं शूद्राणां त्र्यस्रं स्त्रीणां यो
न्याकारमिति तेषां च पूर्वादिकुंडेषु तत्र प्राग्वा दक्षिणयोनि ईशानस्थं चैकं पूर्वाग्रं पश्चिमयोनिः
योनिकुंडे योनिर्न भवति तत्र मतिकुंडे कलशस्थापनमिति केचित् आचार्यकुंड एवेति संप्रदायः
आचार्यकुंडे देवमर्चयाग्निप्रणयनं उत्तमा नवकुंडी पंचकुंडी मध्यमा एककुंडी चाधमा इति

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰
प॰प॰
२९


29


संप्रदायविधः पंचकरीपक्षे चतुर्दिक्षु कुण्डचतुष्टयं पंचमं त्वीशान इति एककरीपक्षे ईशानेऽथवा
प्रतिमाया नैरृत्यदिशि कुण्ड इति सर्वकुण्डेषु वामशंकिकिणीयुते ध्वजपताके स्यातां दक्षिणे ध्वजं वा-
मे पताकां स्थापयेत् चतुष्कोणं ध्वजं त्रिकोणां पताकेति संप्रदायः [illegible] पंचहस्तो ध्वजः
कार्यो वैपुल्येन द्विहस्तकः सप्तहस्ता पताका स्याद्विंशांगुलिविस्तृता दशहस्ता पताका वा द्वाद-
शहस्ता पंचांशवेष्टिताः सिंदूरा कर्बुरा धूम्रा धूम्रराभेन्द्रसन्निभाः हरिता पाण्डुवर्णा च स्युः प्राग्पूर्वा-
दितः क्रमात् एवं वर्णा शुभा कार्या पताका पापनाशना इति यद्यप्यत्र कुण्डविषये श्रीकान्तः प्रा-
ह नः कर्मान्ते स्थण्डिलेन न पश्चाद्दिन सिद्ध्यर्थं शान्त्यर्थं वा न वेदेन ईशानो सर्वकामाय
शान्त्यर्थं वाभिचारिके नैरृत्ये पुत्रलाभाय पुष्ट्यर्थं वायवेन तु विस्माय न स्वकम्भतयापि ही-
नमानाधिकं कुण्डमनेकभयदं भवेदित्यथैतद्धीनमानाधिके दोषश्रवणान्न कुण्डः साध्य-
त्वाद्धोमः कार्यो न विधिवत् कृतः वा स्थण्डिले पि वेद्यां वाथवा कोष्ठे कुण्डस्थण्डिलयोः समत्वेनाभिधाना-
त् स्थण्डिलस्य स्वत्वे साध्यत्वात् चापरस्य तेन कुण्डपक्षान् उक्तं च अर्के चेन्मधु विन्देत किमर्थं पर्वतं
व्रजेत् इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेदिति अतः स्वल्पयागे शुद्धस्थण्डिलपक्ष एवाश्रि-
तः सर्वशिष्टैः स्थण्डिलं वालुकादिना कार्यं द्व्यंगुलोच्छ्रितं स्वल्पचरुहोमे प्रति ते ष्यंगुलोच्छ्रितं स-
हस्रे अयुते च्छ्रितं मयुते ते लक्षहोमे चतुरंगुलोच्छ्रितमेव नाधिकं विस्तृतास्मानं चतुष्कुण्डवद्देवके

२९

© Dharmartha Trust J&K. Digitized by eGangotri

चिन्तस्थंडिले पद्मेवला ॐ ऽवनकुर्वेति ग्रहवीहीचस्थंडिलपद्मेपिकार्यावेघामावाहयेद्धरि
मितिवचनात् इति ॐ ऽस्तनिर्माणं अथाभिषेकार्थंस्वस्तिके
हरिभक्तिविलासे विष्टिद्विगानचतुष्कानिभित्वाषोडशधा
पुनः मार्जयेत्स्वस्तिकाकारंपीनास्तितसितरकोणैरिति
विद्विगानचतुष्कानिषोडशाकोष्ठात्मकानिकृत्वापुनस्ता
निषोडशधाभित्वामध्येचतुरस्त्रषोडशाकोष्ठैःस्वस्तिकाका
रंपद्माकारंमार्जयेत् इदंस्वस्तिकमंडलम् अथयन्तार्थंच





तुष्षष्टिपदवा
स्तुमंडलोद्धारः वराहः अष्टाष्टकपदमथवास्तु ।
वाम्बेरोत्रकोणगास्तिर्थकु ब्रह्मावतुष्पदोस्मि
न्षट्पदावलकोणसंस्थाः अष्टौचबहिःकोणाघ्र ।
र्द्धपदास्तुभयस्थिताःसार्द्धाःउक्तेभ्योयेशेषास्ते
द्विपदाविंशतिस्तेहि इदंयज्ञपवस्तुजनीयम् ।
उक्तेहरिभक्तिविलासेचतुष्षष्टिपदंयत्तेपकाशी

© Dharmartha Trust J&K. Digitized by eGangotri

अ०
प०प०
३०
30

तिपदं स्वहृदि इति अष्टाष्टेत्यस्यायमर्थः अथवाष्टाष्टकपदं चतुष्षष्टिपदं तेनैकाशीतेन पतङ्कम
भवति नवनवरवैर्नराघवनोरेखाः कृत्वावृतः षष्टिपदानि भवंति तत्र कोणगास्तिर्यक् चतस्रो
रेखाः कृत्वा कोणचतुष्टये तिर्यग्रेखाकोष्ठत्रयमध्यगताः कार्या इति अस्मिंश्च चतुष्षष्टिपदे तै
मध्ये ब्रह्मा चतुष्पदः ब्रह्मकोणस्याष्टौ देवा अर्द्धपदाः तद्यथा आपश्चापवत्सः सविता सवित्रो
विबुधाधिपतिर्जयंतो राजयक्ष्मा रुद्रश्चेति बाह्यकोणेष्वष्टौ तेर्द्धपदा देवाः तथा हि शिख्यन्तरिक्षा
निलमृगाधिपपितृपापयक्ष्मरोगादितय इति तदित्यनेन त्रिष्वा विंशत्कोणगानां परामर्शः तेषां
बाह्यपार्श्वस्था देवा अष्टौ सार्द्धपदास्तेयाः तद्यथा पर्जन्यभृशपूषभृंगराजदौवारिकशोषा।
नागाधिपादितय इति अतः परं कथितेभ्यो ये शेषाः परिशिष्टास्ते विंशतिर्द्विपदास्तेयाः जयंतो।
इन्द्रसूर्यसत्यवितथगृहक्षतयमगंधर्वसुग्रीवकुसुमदंतासुरपाशरक्षसुरभल्लाटसोमभुजगार्यम
विवस्वान्मित्रपृथ्वीधरा एते विंशतिर्द्विपदाः स्नानयोगः अयोगे इति चतुष्षष्टिपदवास्तुमंड
लम् अथाभिषेकार्थमवभृथस्नानार्थं रुद्रकलशमारुणमाख्य प्राग्नैरृतेन तस्माच्च दक्षिणे तत्र वि
भूषितं आम्रपल्लवसंयुक्तं फलवस्त्रपुष्पान्वितं प्राग्नैरृतेनेति ईशानमारभ्येत्यर्थः तस्मात्कुंडादि।
त्यर्थः तथाकुंडरस्पेति शान्तिकलशं स्थापयेत् पंचवल्कसमायुक्तं पंचभंगायुतं तथा स्थापयेद्व
रुणं भवरुणं तत्र विन्यसेत् अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः पंचभंगा इति प्रोक्ताः सर्वक। १०

© Dharmartha Trust J&K. Digitized by eGangotri

मिस्त्रशोभना गंगायाः सलिलैः सर्वाः समुद्राश्च सरांसि च गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुला
त् मृद्मानीय विप्रेंद्र सर्वौषधिसमन्वितं स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् अथ यमेवाभि
षेककलशो रुद्रकलश इति पर्यायः वसिष्ठः अथाभिषेकमंत्रेण वाद्यमंगलगीतकैः पूर्ण
कुंभेन तेनैव द्विजो मातेश्वराग्रदृक् स्रुवैः अक्षतं गावश्चैव वस्त्रेण हेमस्रग्दामभूषितैः यजमानस्य
कर्तव्य ऋत्विग्भिः स्नपनं बुधैरिति अथाभिषेकार्थं विशेषविधिमाह वसिष्ठः स्वस्तिकं कल्पयेत्।
तस्मात् कुंभस्येशानभागतः यजमानाभिषेकार्थं तत्र भद्रासने न्यसेत् प्राङ्मुखो सोपविष्ट।
स्य यजमानस्य तत्र च अभिषेकं ततः कुर्युः स्नाताधीताः षोडशर्त्विजः विविधैर्मंगलैर्घोषैः सूतमा
गधैः सह ततस्तस्याभिषिक्तस्य वस्त्रार्थं बलमन्ततिं पेत् दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराज।
येत्ततः शुक्लमाल्याम्बरधरः शुक्लमाल्यानुलेपनः ततो मंडपमागम्य ध्यायेदग्निं प्रवान्तं महान् प्र
योक्ष्यति मंत्रैः सूद्यायामग्नौ निलीनं न इति रुद्रकलशः अथ पंचभूसंस्काराः संमूहयेत्त्रीनेन।
स्नानेन वा इति संस्काराः स्नाने संस्कारा उपमंत्रकाः एषएवविधिर्यत्र क्वचिद्धोम इति पारस्करात्स्ना
नात् यत्र क्वापि होमस्तत्र एष विधिरेव कार्यः न शाखांतरप्रोक्तात् क्रिया न मंत्रं बलमिति तदेषः
तथा च पारस्करः परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधायेति परिसमूहेति परिसमूह
नेपांसुपसारणो तत्र कुशाः प्राक्संस्थमुदक्संस्थं वा कार्यम् वेदिं परिसमूहश्चाग्रदक्षिणेति श्रौत

तौ

© Dharmartha Trust J&K. Digitized by eGangotri

गृ॰
प॰प॰
३१

31

कात्यायनात् अथ प्रागग्रे अपि प्रागुदग्वा कार्यः उपलिप्येति उपलेपनं गोमयाद्भिस्त्रिवारम् गोमया-
द्भिस्त्रिरेव स्यादिति कारिकाकारवचनात् उल्लिख्येति उल्लेखनं रेखाकरणं तिस्रः प्रागग्रा उदक्संस्था
स्थण्डिलपरिमाणाः स्फ्येन कार्याः अथ स्फ्यमादाय परिलिखति वज्रो वै स्फ्यो भवति वज्रेणैवैतत्प-
रिलिखति त्रिः कृत्वा परिलिखतीति श्रुतेः तिस्रः प्रागग्रास्तिस्र उल्लिखेदिति कारिकापि स्फ्याकारो
खादिरः स्फ्यो भवति स्फ्याभावे स्रुवेण कुशेन वोल्लेखनं स्थण्डिलोल्लेखनं कुर्यात् स्रुवेण कुशे-
नेति वचनात् उद्धृत्येति उद्धरणं चोल्लिखितपांसूनां रेखातः कारिका तयांशूनुद्धरेत्तावदिति
अभ्युक्ष्येति अभ्युक्षणं जलेन कार्यम् उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम् तिरश्चावोक्षणं प्रो-
क्तं नीचेनाभ्युक्षणं स्मृतमिति परिशिष्टवचनात् नवेन नवीनकांस्येन नूतनमृच्छरावेण वा स्वयमु-
प्रि समानीयाभिमुखं निदध्यात् उद्धृतेवोदितेऽग्निमादधतीति श्रुतिलिङ्गात् कांस्यरत्नाकरेष्वभाव-
पात्रेण कांस्यस्याभावे नाग्निमण्येषु धः तदभावे शरावेणाभिमुखं वचनमिति गार्ह्येऽत्र ताम्रपा-
त्रेण शरावेण वा यथाविभवतोऽपि वा जातवेदः समानीय विप्रः स्वे विनिवेदयेत् इति यथाविभवतः इति
स्वर्णादि स्वर्णादिपात्रविधानार्थं विप्र इति निकृष्टवर्णानिषेधार्थं तेन नापितध्वंसवर्णानीतं नि-
षिद्धं इत्यग्निस्थापनम् श्री अथ प्रयोगः तत्रादौ गणपतिपूजनम् ओं भूर्भुवः स्वः गणपतिरसीति
सकलिके गणपतिं स्थापयेत् ततो गन्धमाल्याद्यैर्मानेर्ध्यानमस्त्विति ब्राह्मणान्स्वस्त्याद्यनुतो लेभ्यो

© Dharmartha Trust J&K. Digitized by eGangotri

दत्वा ॐ स्वस्तिनः पथ्यः ऽपथिषु ॐ विश्वोरवाहे अग्निर्देवतानां भोः शांतिरिति पंचमंत्रात्मकं स्वस्तिवाच
नं यथाशाखया पठेत् ततः संकल्पः ॐ विष्णु ३ ॐ तत्सदद्येह० इत्यादिकालसंकीर्तनं कृत्वा करि
ष्यमाणामुककर्मनिर्विघ्नसमाप्तिसिद्ध्यर्थं मादौ षोडशोपचारैः गणपतिपूजनं महं करिष्ये सं
कल्पजलं पूर्वं भूमौ त्यजेत् सकृन्मेववामदेवतामंडलस्थलतत्वेजातस्नानमामंत्रणमेसेत् ततोऽक्ष
तानादाय ॐ विश्वानि देव सवितः इमा रुद्रायपते देवे सविता रमनोन्तर पृषवे प्रतिष्ठेति पंचमं
त्रान्पठित्वा सकृद्देवसर्वप्रतिष्ठां कुर्यात् आवाहनं १ पुष्पासनं २ पाद्यं ३ अर्घः ४ आचमनीयं ५
स्नानीयं आचमनीयं ६ अधोवस्त्रं आचमनीयं उत्तरीयं आचमनीयं ७ यज्ञोपवीतं आचमनीयं ८
गंधः ९ पुष्पाणि १० धूपः ११ दीपः १२ नैवेद्यं आचमनीयं १३ तांबूलं दक्षिणा वा १४ नमस्कारः १५
उद्वासनं १६ इति षोडशोपचाराः ॐ गणानां त्वेति यजुषः गृत्समद ऋषिर्गणपतिर्देवता गणप
तिपूजने विनियोगः ॐ गणानां त्वा० वसो मम अनेनैव षोडशोपचारैः पूजयेत् ॐ सुमुखश्चैकद।
न्तश्च कपिलो गजकर्णकः लंबोदरश्च विकटो विघ्ननाशो विनायकः धूम्रकेतुर्गणाध्यक्षो भाल
चंद्रो गजाननः द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते इति वक्रतुंड महाकाय कोटिसूर्यसमप्रभ अविघ्नं कुरु मे देव
सर्वकार्येषु सर्वदा इति प्रार्थना इति ततः पूर्वोक्तप्रकारेण स्वस्तिवाचनम पाद्यं अर्घकुशाकेडि

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
प॰प॰
२२

का अग्नेर्दक्षिणतो वारणं काष्ठपीठं निर्मितं ब्रह्मासनमास्तीर्य कुशैस्तद्वाच्छादयेत् ब्रह्माग्नेर्दक्षि
णोत्तमासनमारण्यानि निरस्याप उपस्पृश्य प्राङ्मुखं उपविशति एवं ब्रह्मवरणाभावेऽत्र वरणं अग्रे यथा
धुकाः पञ्चकर्मकर्तृत्वाभिवर्णनात् इत्येव विमादि एवं कर्मैवानन्तमेव ब्रह्मा भवेत् अभिधायतत्रैवोपवे
शने ततः प्रणीताप्रणयनं ततः प्रागग्रैः कुशैरासनं द्वयकल्पने प्रणीताप्रपरित्यागतथा ततो वा
रणं प्रणीतेषु कृतं सव्ये कृत्वा दक्षिणहस्तेनोद्धृत पात्रस्योदकेनान्तरितस्य मेवं परियित्वा दर्भं गृहीत्वा
यमूलोपरिष्ठान्मासनेन निधाय लम्बितं पात्रं दक्षिणतो ब्राह्मणस्य ब्रह्मणः ब्रह्ममवलोक्य समन्ततो यथा
प्रणीता अग्नेर्मध्येन गच्छेदुत्तरासनेस्थापयेत् परिस्तीर्येति ततो दीर्घदर्भं गृहीत्वा अग्नेः समन्तात्स्ता
ग्रैर्बर्हिषमूलैः पूर्वाग्रैः कुशैः प्रादक्षिण्येन परिस्तरणं एवं प्रदक्षिणमेव परिस्तरणमिति कात्यायना
त् तत्रैव क्रमः ईशानादिस्तोम्यान्तं प्रागग्रैः कुशैः परिस्तरणं आह्वतिसामान्यग्रदक्षिणमिति कात्यायना
त् पश्चान्नैऋत्यादीशानान्तं ब्रह्मणो निर्मर्यते तेषसमाहारयत्नात् प्रणीताः प्रणीतापर्यन्तमिति शाखान्तरी
ये अग्रपश्चिमं तेनोत्तरासनस्य तत्त विवरणे अर्थवदासीदेति अग्नेरुत्तरतः प्रणीतापश्चिमेनोत्तरदक्षिणायाम्
त्तत्कुशाग्रपरिप्रणीतापर्यन्तमासादनं पत्रस्य विपुलस्थाने तदभावे कात्यायनक्रमेणासादने तथा
हि यद्यप्यासादनीयानेतत्कात्यायनक्रमेण तमसादार्थं कात्यायनात् द्विशः पदार्थानामासादनमिति तत्रप्रकारः प
वित्रच्छेदनानि त्रीणि पवित्रे द्वे प्रोक्षणीपात्रं प्रादकं तेजसी आज्यस्थाली गव्यमाज्यं तात्रमपीव रु २२

32

14

स्थालीतण्डुलाः स्रुवसंमार्गकुशाः ऽऽ उपयमनकुशास्तेऽपि च प्रभृतयः पालाशः प्रादेशमिताः अङ्गुलि
सदृशाः सवल्कलाः कृमिकीटाकीटादिदोषरहिताः पलाशः प्रादेशमिता अङ्गुलिसदृशाः स।
वल्कला दलिनाः समिधस्त्रिः स्रुवः पान्तिकेवोद्धास्ताः पूर्णपात्रं वरो वा सर्वगौरेव अमदण्डमधु।
कं समिधौ दिसंस्कारार्थं तत्र स्थापयेत् असंस्कृतनस्य वक्षाप्यद्वेपात्रकेः कुशास्तरणं अविषमे अ
वच्छिन्नाग्रे अनन्तर्गर्भे प्रादेशेन मापयित्वा पवित्रच्छेदनैः कुशैः अङ्गुष्ठाङ्गुलिपर्वाभ्यां नखैरस्पृश्य प्रादे
शमात्रे छिन्द्यात् प्रोक्षणीसंस्कारमेति तद्यथा प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्रमार्गेनरे
णप्रणीतोदकं कृत्वा पवित्राभ्यां तस्य पवित्रे प्रोक्षण्यां निधाय दक्षिणेनोत्प्लाव्य सव्ये कृत्वा दक्षि
णेन तदुदकमूर्ध्वं प्रक्षाल्य प्रणीतोदकेनानाः प्रोक्षणाभिरेवासादितपात्राणि प्रत्येकं प्रोक्षणं कृत्वा
प्रोक्षणीं वोर्ध्वहस्तेन तत्र मात्रं वेत्र संचरेन्निदध्यात् ततः प्रधानार्थनिर्मिहिता यामाज्यस्थाली मासादि।
तान्निर्वापः चरुस्थाल्यां प्रणीतोदकमासिच्य सादितनं तण्डुलप्रक्षेपः आज्याधिश्रयणं चरोरधि।
श्रयणमाज्यस्योत्तरतः आज्यचर्वोः प्रदक्षिणं पर्यग्निकरणं पर्यग्निकरणं ज्वलदुल्मुकस्य परिभ्र
मणं श्रुतेचरोदक्षिणेन सव्यमादाय प्रोक्ष्य मध्यस्थरेखमध्ये तापयित्वा सव्ये कृत्वा दक्षिणकरेण स
मार्गाग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रमारभ्याधस्तान्मूलपर्यन्तं संमृज्य प्रणीतोदकेनाभिषिच्य स्रु
वं वामेन ततः प्रत्यग् दक्षिणतः कुशेषु निदध्यात् एवं प्रुवोऽपि संस्काराः कार्याः सर्वस्रुवस्यैव संस्कारः

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
प॰प॰
११

33

स्रुक्‌निधाने स्रुवो न रतः संमार्गकुशानां वह्नौ प्रक्षेपः ततोऽग्नेः सकाशादाज्यं गृहीत्वा चरोः स्रुवेणानी
ताऽग्नेरुत्तरतो निराधचरुमादायाज्यपश्चिमतो नीत्वाज्यस्योत्तरतो निधायोद्वासितमाज्यमग्नेः
पश्चात्याप्यचरुमाज्यस्योत्तरतो निदध्यात् पवित्राभ्यामाज्यस्योत्पवने तत्र वेलक्षणं ततो पदस्य निरसने
पवित्राभ्यां प्रोक्षणेऽप्युत्पवने आज्योत्पवने च कार्यं प्रोक्षणे च सर्वत्र पवित्रनिधाने उपयमनकुशा
नां दक्षिणेन तेषामस्य निधाने ततो दक्षिणेन समिदाने ततउत्थाने नासां सर्वीयाणां वह्नौ प्रक्षेपः
ततः पवित्रादाने सर्वेन प्रोक्षणीजलेन सपवित्रेणाग्निमीशानादुदकार्यंत प्रदक्षिणं पर्युक्षणं अपी
तास्व पवित्रनिधाने एषएव विधिर्यत्रकचिद्धोमः तत्र होतारं पहितो मंत्रविशेषः क्रियाविशेषश्च।
ति इतिकातीयकुशकण्डिका ततो होमः आघारावाज्यभागौ प्रधानहोमो ग्रहादिहोमश्च तदुत्तरांगं।
अथ संस्कारप्रविहितं वा कर्मप्रयोगतत्र होमो स्विष्टेनवाहुत्यो बलिः पूर्णाहुतिर्लघ्वा श्रेयः संपाद
ने दानमभिषेको विसर्जनमित्युत्तरांगानि अथ स्थापितदेवतानां सृजनं तत्र पंचोपचा
रिकं दक्षिणोपचारिकं वा तत्र तावदग्नेयज्ञस्य पदेति मंत्रेणाग्निं सृजयेत् ततः सूर्यादिग्रहानधिदेवा
न् प्रत्यधिदेवान् लोकपालान् मंडलदेवान् प्रधानदेवान् दिक्पालान् स्वस्ववेदमंत्रेण नाम
मंत्रेण वा सृजयेत् स्विष्टमिति स्विष्टकृद्धोमः स्थालीपाकोन गोदानदेने कृत्वा तद्देकार्यः सच।
यथाध्याद स्पष्ट विस्तरमहाव्याहृतिभ्यः प्राक् स्विष्टकृद्भवति ॥ १ ॥

११

© Dharmartha Trust J&K. Digitized by eGangotri

पारस्करः प्राङ्महाव्याहृतिभिः स्विष्टकृच्चैदाज्यस्य हविरिति केवलाज्यहोममेव स्पष्टं सूत्रे त्रया।
दयवशात्रणे नवाहुत्य इति तिस्रो महाव्याहृतयः पंचवायव्यादिमंत्रोक्ताः प्राजापत्यं चेति ततो
बलिः बलिदाने च हुतिशेषद्रव्येण बलिदानमाह ब्रह्मणः परिशिष्टे कात्यायनः अग्रेषु बलि
नमस्तस्मै वबलिदानं विधायते बलिदानप्रदानार्थं नमस्कारः कृतः प्रयेति विशेषबलिस्तना।
त्रिकेलकूष्माण्डैर्नवैरपि च गम्यनमस्तद्येणदेयः गंधपुष्पादिद्रव्यकैर्वस्त्रेण देवस्य चाग्रतो दद्यात्
पापमर्दीपादिसंयुक्तामिति नवरात्रिकालानां प्रथममेव बलिदानमिति संप्रदायः ततः पूर्णाहुतिः।
कात्यायनः पूर्णाहुतिं तु होतास्समन्त इति अग्निपुराणे मूर्द्धानमिति मंत्रेण स्रुक्स्रुवे संप्रदायत्
पादुत्थाय पूर्णां वै नोपविश्य कदाचनेति मात्स्येपि पूर्णाहुतिं च मूर्द्धानं दिव इत्यभिपातयेदिति।
जातवेदस इति शान्त्योनवीयमाध्यंदिनेयेन पठनीयमिति शान्तिमयूखे स्थितं ततो वसोर्द्धारा वि
नाममेण घृतकुम्भवसोर्द्धारां पातयेदनिलोपरि: ॐ वसोर्मघार्हीचयस्वीकोटिर्यजितो वाङ्मा
त्रं स्तवः कृत्वा ततः ॐ भद्रयोपरि घृतधारां यथा समग्रान्नेरूपरिपातयेत् आवयेत्तत्क्रमात् मे यं वै
श्वैरौद्रमदवम् महावैश्वानरे सम्यक्कुर्यात् स्वसाम्यमपापदयोदिति ततस्त्र्यायुषमिति भस्मधारणं अ
खलायनः स्नात्वा पुंड्रं मृदा कुर्यात् हुतो वैवत्रभस्मना देवानामर्च्चं गंधेन सर्वपापापनुत्तये इति पूर्णा
हुत्यन्ते भस्मधारणमिति संप्रदायः संस्रवप्राशनं पवित्रप्रतिपत्तिः ग्रंथियुतेन ग्रंथिं विमुच्येति दक्षी

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र०

प०प०

३४

34

वेद्योदयः घृतेनपवित्रेकर्मांतेग्रंथिंमुक्त्वाचतत्त्यजेत् विसृज्यपदिग्रंथिंतत्पवित्रंचत्यजेत्ततः चरेत्सा
नपनेकृत्वा तत्किल्बिषविशुद्धये इति वह्निहोमोग्न्याधानपूर्ववह्निंहुत्वाप्राणाग्नामिति तेनैवाभि
धानात् एवमेवकर्कहरिहरादयः संक्षेपेब्रह्मदक्षिणासंपूर्णपात्रं ततः श्रेयःसंपादनं वहुवसि
ष्ठः आचार्यप्रभृतिभ्यश्चग्रहार्चनफलं ततः समिदाज्यचरूणांचतिलहोमफलं तथा वलितेकं
भक्तजायाचार्चनस्यफलंचयत् लोकपालगणेशाद्यास्तथायाश्चगदेवताः तासांजपफलंतद्व
द्धोनाजलपूर्वकमिति तत्रैव तत्तस्मैयथाशक्तिदानमथादक्षिणाश्रुमाश्रितदक्षिणादानम
युक्तं विविधोग्रहयज्ञः अयुतलक्षकोटिहोमात्मा तत्रायुतहोमेदक्षिणा सुवर्णपकपिलांधेनुं
दद्याद्वैतथैवदेवे रक्तंधुरंधरंदद्यात्त्रिमाषकरूपादिकं वृषाश्चजातरूपंगुरवे पीतवाससी धेनु
श्चैतैरष्टगुरवेकृष्णांगामनुकूलमनवे असितचयाद्हववद्याकेतवेछागमुत्तममिति अत्रवक्रस्यमूल्य
तेनववस्त्रंताहोमपराभावस्यवनूस्तेन नैवेपमंत्रसविहागार्थेदक्षिणास्यांसुवर्णेनसमानताकार्या
तथाचोक्तं सुवर्णेनसमाकार्या यजमानेनदक्षिणा देयाल्पाद्विजश्रेष्ठ सर्वाश्चमूल्यतः समा
इति यथासर्वाप्रत्येकं दशमाषसुवर्णेनसमाभवति तथा दशमाषसुवर्णेनसमाः प्रत्येकं द
क्षिणादेया इतिसम्यक् यद्वाप्रत्येकंदशमाषदशमाषसुवर्णंदक्षिणांदद्यात् लक्षोदसर्वेषामेव
कोटवनमिति अथवाप्रत्येकग्रहमेकैकांगांदक्षिणा पारिजाते सर्वेषामथवागावोगुरुर्वाप्येन

© Dharmartha Trust J&K. Digitized by eGangotri

न्नुष्यति स्वर्णमेवेणाप्रदातव्याः सर्वासर्वत्र दक्षिणा अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः यजमा
नमदक्षिणो नास्ति यज्ञसमो रिपुरिति स्कान्दे यथाग्रहोक्तिनस्तद्दत्त विधिनो वेदपारगाः तोष
येन्महद्वस्त्राद्यैस्तुष्टमेनं विसर्जयेत् इत्ययुतहोमः मात्स्ये अस्माद्दशगुणः प्रोक्तो लक्षहो
मस्स्वयंभुवा आहुतिभिः प्रयत्नेन दक्षिणाभिस्तथैव च नवग्रहमखे सर्वे लक्षहोमे दशोत्तरम्
जपाद्यमतिशाहेलम् भूषणान्यपि शक्तितः शयनानि सवस्त्राणि हैमानि कटिकानि च अंगुली
यपवित्राणि केटसूत्राणि शक्तितः न कुर्याद्दक्षिणाहीनं वित्तशाठ्यं विवर्जयेत् अददल्लोभमो
हाद्धाकुलक्षयमवाप्नुयात् अन्नदानं यथाशक्त्यादातव्यं भूतिमिच्छता अन्नहीनेकृतो यस्माद्दु
र्भिक्षफलदो भवेदिति गुरवे द्विगुणां देयाप्यथ सर्वत्र निश्चय इति लक्षहोमः अथ कोटिहोमः स
मास्तो कोटिहोमस्सकार्यस्तु महोत्सवे ध्मवादित्रगीताद्यैर्मंगलद्रव्यदीप्तिः स्वनैः शंखतूर्यनिनादै
नवस्त्रवेणाश्च ततस्तु दत्तये द्विजान्ऋत्विजः श्रद्धयान्वितः एकैकं कनकं स्वर्णं कुंडलैर्विविधैर्ल
प गोशतेनैव दातव्यमस्यानां चशतेन तथा सहस्रं वसुवर्णस्य सर्वेषामपि दापयेत् ग्रामैर्गजैरथै
रश्वैः कूपैः संसृजयेद्गुरुं हीनं धर्मकृपणानां सर्वेषां वस्त्रानेन्यापि सृजयेत् हित्वा सृजयेद्वित्तस्याविंत्तशाठ्यं
विवर्जयेदिति इति दक्षिणानिर्णयः आश्वलायनः यथाशक्ति ततो विप्रान्ऋत्विजश्चेतरानपि एके
कं महाहुतौ विप्रं होमे वस्त्रेन भोजयेत् अनर्घ्यं मध्यमस्यापि विप्रमेकं प्रताहुतौ सहस्रस्याहुतौ चैकं

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
ग॰प॰
३५

35

नववर्षेविप्रभोजनमिति अन्नहीनोदहेद्राष्ट्रंभिन्नफलदोभवेत् गृह्ययेत्ततः शास्त्राद्विप्रानत्र
नभोजयेदिति इतिब्राह्मणभोजननिर्णयः भद्रेति॰ देवसेना ९ पितृभ्यः स्वधेति॰ स्वधा १०
स्वाहायज्ञमिति॰ स्वाहा ११ आपोअस्मान् इति॰ मातरः १२ विश्वेअद्य इति॰ लोकमातरः १३
अनाधृष्टा इति॰ धृतिं १४ तुष्टातुरियो॰ इतितुष्टिम् अथमातृस्थापनप्रयोगः नमस्कृतमोपलिः
कृत्वानाधौतवासाः कृतस्वस्त्ययनः कर्ताद्भ्योऽधिकरणानुपकल्प्यासनाद्युः स्वस्त्युपविश्यपयवकुश
नलाभादायदेशकालसंकीर्तनंकृत्वाकर्मांगत्वेननिर्विघ्नतायैगणपतिसहितगौर्यादि
चतुर्दशषोडशमातृकास्थापनमहंकरिष्ये इतिसंकल्पंकुर्यात् प्रतिमासुवेश्यपत्नीयकाष्ठ
पट्टपटादिलिखितप्रतिमासुसत् पिष्टेनस्वर्णीफलेषुवा अक्षतैः ॐभू॰ गणपतेइहागच्छइ
हतिष्ठ १ एवंगौरि॰ २ पद्मे ३ शचि ४ मेध ५ सावित्रि ६ विजये ७ जये ८ देवसेने ९ स्वधे १० स्वा
हे ११ धृते १२ पुष्टे १३ तुष्टे १४ आत्मकुलदेवते १५ इतिस्थापयेत् एवंवत् गणानांत्वेति गणेशं १
१ आयंगौः॰ शर्मासवधूरितिवा गौरी २ हिरण्यरूपाउषसो॰ पद्मा ३ कदाचनस्तरी॰ शची ४
मेधांमे॰ मेधा ५ सावित्रीमिति॰ सावित्री ६ विजयंधनुरिति॰ विजया ७ यातेरुद्र इति॰ जया ८ देव
सेनाभद्र इति॰ देवसेना ९ पितृभ्यः स्वधेति॰ स्वधा १० स्वाहायज्ञमिति स्वाहा ११ आपोअस्मान् इतिमा
तरः १२ विश्वेअद्य इति॰ लोकमातरः १३ अनाधृष्टा इति॰ धृतिं १४ तुष्टातुरियो॰ इतितुष्टिम् १५ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

रयिष्ठमेतिप्रहि ९ अंबेअंबिके इति आत्मकुलदेवतां ९ आवाहयामि इति सर्वत्र इति प्रत्येकमा।
वाह्य मनोजूतिरिति प्रतिष्ठाप्य ओंभूर्भुवःस्वः गणपतये नमः इति स्वस्ववेदमंत्रेण वाः सर्वाः षो
डशोपचारैः पूजयेत् मातॄणां गणेशवत् देशादेवताल्पत्वे तदापि गणपतिश्चाकुसंपूज्य गौर्यादि
षष्ठवदेशास्थ्याः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा धृतिः पुष्टिः स्व।
ष्टिः आत्मकुलदेवता इहागच्छ इह तिष्ठ इत्यम् इत्यावाह्य प्रतिष्ठाप्य वा ओं यो वः ओं गौर्यादिचतुर्द
शमातृभ्यो नमः इति षोडशोपचारैः सकृद्वा पूजयेत् यद्वा ओं गणपत्यादिचतुर्दशमातृभ्यो न।
म इति समुदितरूपेण सर्वं षडुपचारैः पूजयेत् एवं षोडशोपचारेऽपि त्रैयम् इति षोडशमातृपूजा।
अथ वसोर्धारापूजनं तत्र प्रकारः पूगीफलं कुड्ये निधाय गव्यघृतेन तावत्संख्या पंचसप्त वा धारा
कार्याः तत्र मंत्रः वसोः पवित्रं ओं भूर्भुवः स्वः श्री इहागच्छ इह तिष्ठ एवं सर्वत्र मनस इति श्री श्रीश्चेतिल
क्ष्मीं विधृतिनीभ्यामिति धृतिं मेधां मे इति मेधाम् स्वाहा प्राणेभ्य इति स्वाहां उत्पादेभ्यः ऊर्जमिति
प्रज्ञाम् पावकान इति सरस्वतीम् आवाहयामीति सर्वत्र मनोजूतिरिति प्रतिष्ठाप्य ततश्चैतेन
मंत स्वस्वमूलमंत्रेण षोडशोपचारैः पूजयेत् यद्वा आयो॰ स्वान्निति सकृद्देवं पूजयेत् तत आयु।
ष्यं मंत्रजपः आयुष्यं वर्चस्यं ततस्त्वाश्रसि २ यदाबध्नमिति इत्यायुष्यजपः ॥ ६ ॥ अथ संक
ल्पनांदीश्राद्धप्रयोगाः तत्र स्वाचांतः सुस्नातानां शीलानां धौतवाससां ब्राह्मणानाहूय बहिरुपलिप्ते गो।

चौं

© Dharmartha Trust J&K. Digitized by eGangotri

इदं वः पाद्यं पादप्रक्षालनं वृद्धिः

यो

मध्ये पलिखेन्मण्डले स्वागतेन वः सुस्वागतमिति कामसत्यवसुसंज्ञका विश्वेदेवा ॐ भूर्भुवः स्वः इदं वः पा
द्यं पादप्रक्षालनं वृद्धिः । गोत्रा मातृपितामही प्रपितामह्यः नान्दीमुख्य ॐ भूर्भुवः स्वः इदं वः पाद्यं पा
दप्रक्षालनं वृद्धिः । गोत्राः पितापितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः गोत्रा मातामह
प्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः आचमनीयाणि नाय मु अमु
क कर्मांगतया विहितेन सांकल्पेन विधिना नान्दीश्राद्धमहं करिष्ये सत्यवसुसंज्ञका नान्दीविश्वेदेवा
नां ॐ भूर्भुवः स्वः इदमासनं स्वासनं नान्दीश्राद्धे क्षणः क्रियेतामिति पृच्छ गपह्लानि मेघ ॐ तथेति
विप्रान्प्रागुपवेश्य प्राप्नुतां भवन्तौ प्राप्नुवावः वैश्वदेववामित्रे वहिर्वचनं तेन विप्रद्वयप्रत्यगं उपा
न गोत्राणां मातृपितामही प्रपितामहीनां नान्दीमुखीनां ॐ भूर्भुवः स्वः इदमासनं स्वासनं ना
न्दीश्राद्धे क्षणः क्रियेतां ॐ तथेति प्रत्युक्तिः प्राप्नुतां भवन्तौ प्राप्नुवावः गोत्राणां पितृपितामहप्रपि
तामहानां प्रमातामहादीनां एवं चेत् एवं मातामहादीनामपि ततो गन्धादीनां प्रदाने सत्यवसुसंज्ञकेभ्यो
विश्वेभ्यो देवेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । गोत्राभ्यो मातृपितामही प्रपितामहीभ्यो ना
न्दीमुखीभ्यः इदं गन्धाद्यर्चनं एवं पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यः मातामहप्रमातामहवृद्धप्रमाता
महेभ्यः सपत्नीकेभ्यो नान्दीमुखेभ्यः इत्यादि ततः परिविष्य गायत्र्या प्रोक्ष्य पृथिवी इति पात्रालंभनं ।
सत्यवसुसंज्ञका विश्वेदेवा ॐ भूर्भुवः स्वः इदं वो युग्मब्राह्मणभोजनपर्याप्तं मदास्य मानमन्नं ।

मतद्रूपेण स्वाहा संपद्यतां वृद्धिः गोत्राः मातृपितामहीप्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवः स्वः इदं
वोर्घ्यमब्राह्मणभोजनपर्याप्तं दास्यमानममृतद्रूपेण स्वाहा संपद्यतां वृद्धिः गोत्राः पितृपितामह
प्रपितामहा नांदीमुखा ॐ भूर्भुवः स्वः इदं वोर्घ्यमित्यादि एवं मातामह प्रमातामह वृद्धप्रमाता।
महा इत्यादि यथागोत्रेभ्यः स्वस्तिनं इंद्रः इति पाठः अनेन नांदीश्राद्धेन नांदीमुखा देवताः प्रीयतां।
वृद्धिः ततोऽत्रान्नपिंडमंत्रवर्जं जपः मधु मधु इति जपेत् मधुवाता इति त्र्यृचस्थाने इयासेमायतां
मितिपदवर्जं जपेत् रमान् तावान् नांदीश्राद्धं संपन्नमिति इष्टेस्तु संपन्नमिति तेरुके शेषमन्नं किं क्रि।
यतामिति इष्टैः इष्टैः सहभोज्यतामिति तेरुके ब्राह्मणान् वाचयेत् सुप्रोक्षितमस्तु शिवा आपः
संतु सौमनस्यमस्तु अक्षतं चारिष्टमस्तु सत्यवसुसंज्ञका विश्वेदेवाः प्रीयंताम् नांदीमुख्यो मा
तृपितामहीप्रपितामह्यः प्रीयंतां नांदीमुखाः पितृपितामहप्रपितामहाः प्रीयंतां गोत्रं नो वर्द्धं
तामित्युक्ते दातारो नोऽभिवर्द्धंतां वेदाः संततिरेव च नः श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु अन्नं।
च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचनेति सम्यक्त्वे विप्रैः अ।
स्तु न इत्युक्ते दातारो वोऽभिवर्द्धंतां वेदाः संततिरेव वः श्रद्धा च वो मा व्यगमद् बहुदेयं च वोऽस्तु अन्नं च वो
बहु भवेदतिथींश्च लभध्वं याचितारश्च वः संतु मा च याचिढ्वं कंचनेति पठेत् ततः अस्य नांदीश्राद्ध
सफलमिति शर्मसत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो मातृपितामहीप्रपितामहीभ्यो नांदी।

गोत्रं नो वर्द्धतां

धं

© Dharmartha Trust J&K. Digitized by eGangotri

श्र.
प.प.
३०
37

पुर्वेभ्यः पितृपितामहप्रपितामहेभ्यो मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नी
केभ्यो नांदीमुखेभ्यो ब्राह्मणामलकानिष्क्रयणीदक्षिणां दातुमहमुत्सृजे ततः मातापितामही
चैवतथैवप्रपितामही पितापितामहश्चैवतथैवप्रपितामहः मातामहस्तत्पिता च प्रमाता
महकादयः एतेभवंतुमेप्रीताः प्रयच्छंतु हि मंगलं इमंकाण्डमंत्रमितिपाठंसंहृदनेनैवहाप्र
हेवाकुर्यात् ततो विश्वेदेवाः प्रीयंतां प्रीयंतामिति प्रत्युक्ते स्वस्ति भवंतो ब्रुवंत्विति सर्वांन्प्रत्युक्ते
स्वस्तीति तैरुक्ते ब्राह्मणान् प्रणिपत्य प्रसाद्य वाजेवाजेवंतेति मात्राद्विद्विजपूर्वकं विसृज्य आ
मावाजस्येति विश्वेदेवविप्राननुव्रज्य प्रदक्षिणीकृत्य आवासेत् ततो मातृकादि विसर्जयेत् प्र
सन्नांदीश्राद्धस्यन्यूनातिरिक्तो यो विधिः स स सर्वोपि भवतां ब्राह्मणानां वचनात् परिपूर्णोस्तु
विप्राः सर्वेन्यूनातिरिक्तं नांदीमुखदेवताप्रसादात् परिपूर्णमस्तु इतिब्रूयुर्विसृज्य स्मरेत प्रसादात्पठे
त इति संकल्पनांदीप्रयोगः अथ वैश्वदेवप्रयोगः पर्युक्षितेऽस्मिन्वह्नौ तदभावे जले तदभावे
भूमौ शाकाद्यन्नं गृहीत्वा फलमहितं वा पंचाहुतीर्जुहुयात् ॐ ब्रह्मणे स्वाहा ॐ प्रजापतये स्वा
हा ॐ गृह्याभ्यः स्वाहा ॐ कश्यपाय स्वाहा ॐ अनुमतये स्वाहा ततो हुतशेषान्नेन बलिदानम्
ॐ पर्जन्याय नमः ॐ अद्भ्यो नमः ॐ पृथिव्यै नमः इमं द्वारसन्निधौ ॐ धात्रे नमः ॐ विधात्रे नमः
इति द्वारयोः ॐ वायवे नमः इति प्रतिदिशं ॐ प्राच्यै नमः ॐ अवाच्यै नमः ॐ प्रतीच्यै नमः ॐ उ।

© Dharmartha Trust J&K. Digitized by eGangotri

दीच्यैनमः इत्यपिप्रतिदिशं ॐब्रह्मणेनमः ॐअंतरीक्षायनमः ॐसूर्य्यायनमः इतिमध्ये ॐ
विश्वेभ्योदेवेभ्योनमः ॐविश्वेभ्योभूतेभ्योनमः ॐउषसेनमः ॐभूतानांपतयेनमः इत्युत्तरेण
ये ततःप्राचीनावीतीदक्षिणाभिमुखःपातितवामजानुःपितृतीर्थेनदक्षिणस्यांदिशि ॐपि
तृभ्यःस्वधानमः इतिदद्यात इतिनिर्णेजनांतनिये ततःप्राचमने ततोवलिमपात्रंप्रक्षाल्य
यक्ष्मैतत्तेनिर्णेजनंनमः इतिवायव्यांदिशिदद्यात् ततःस्वाध्यायसिद्ध्यर्थमेकांगायत्रीजपेत् त
तोनिवीतीइदमन्नंब्राह्मणायहंतंतेइतिसंकल्प्यकस्मैचिद्ब्राह्मणायदद्यात् गृहद्वारादेशानासे
भवैःश्वभिःपश्चिमतश्चतुरस्रमंडलेयात्रादौवलिदानेयत्नवसेनततं पत्निसंकर्मणःप्राक्कार्यं
ततःकाम्यंभोजनसमयेकार्यम् विष्णुपुराणे ततोन्यदन्नमादायभूमिभागेशुचौपुनःदद्याद
शेषभूतेभ्यःस्व पातसमाहितः देवामनुष्याःपशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाःप्रेता
पिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तं १ पिपीलिकाःकीटपतंगकाद्याविभुक्षिताः
कर्मनिवद्धवद्धाः प्रयांतुतेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु २ येषांनमातानपि
तानवंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति तत्तृप्तयेन्नंभुविदत्तमेतत्तेयांतुतृप्तिंमुदिताभवंतु भूतानि
सर्वाणितथान्नमेतदहंचविष्णुर्नयतोन्यदस्ति तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभवा
यतेषां चतुर्दशोभूतगणोयएषतत्रस्थितायेखिलभूतसंघाः तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषा

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·
प·ल·
३८

38

मिदं ते मुदिता भवंतु श्वभ्यश्चार्थं नवोद्घाटनेश्च ज्ञासमन्वितः भुवि भूतोपकाराय गृहे सर्वाश्रयो
यतः स्ववेगालविहंगानामित्यपि सर्वसाधारणं बहुभिरभिधानाद्व मनुः शुनां च पतितानां च
श्वपचां पापरोगिणां वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि आसः पैद्धवारुणाश्च याम्याः।
सौम्याश्च नैर्ऋतास्तथा वायसाः प्रतिगृह्णंतु भूमौ पिंडं समर्पितम् ॐ वायसेभ्यो नमः श्वानौ द्वौ श्याम
शबलौ वैवस्वतकुलोद्भवौ ताभ्यां पिंडं प्रयच्छामि स्यातामेतावहिंसकौ ॐ श्वभ्यो नमः ॐ सौरभ।
य्यः सर्वहिताः पवित्राः पुण्यराशयः प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः ॐ गोभ्यो नमः
ततश्चाचमनं विष्णुस्मरणं प्रमादात्सात्वतः इति वैश्वदेवकर्म अथ मंगलस्नानप्रयोगः नित्यक
र्म कृत्वा यमस्कंदकर्म कारयित्वा वत्सगोत्रब्राह्मणेनाचार्यद्वारा स्वस्तिकं लेखयित्वा तदुपरि वा
रुणादिपत्तियकाष्ठपीठं निधाय वेष्टनवस्त्रेणाच्छाद्य तदुपरि प्राङ्मुख उपविश्य संकल्पं कृत्वा वा
द्यादिवेजायमानं स्वांगं तिलगौरसर्षपकल्केनोद्वर्तनं ॐ अग्निर्हि विभोग इति मंत्रेण आम
द्रकादि तिलैः शिरस्नानं सर्वौषधि सर्वगंधयुक्तोष्णवारिणा स्नायात् चतुर्भिर्द्विजैर्भिः
ब्राह्मणैः स्वस्तिवाचनं स्वस्ति नः इन्द्रः पयः पृथिव्यामिति अथ स्वस्तिवाचनं गृहमध्ये गोमयोप
लिप्तायां भूमौ वस्त्राच्छादितपत्तियकाष्ठपीठे चोपविश्य पत्नीं स्ववामे चोपवेश्य यजमानो
यजमानस्य वरमाणप्रयोगेन षोडशोपचारगणपतिपूजनं विधाय ब्राह्मणानां।

३८

© Dharmartha Trust J&K. Digitized by eGangotri

धमासनादिभिः संपूज्य मंडपमध्ये ब्राह्मणैः ॐ पुण्याहं इति तान् त्रिः श्रावयेत् तेच ॐ पुण्याहं इ
त्येतत्रिरेव त्रिः प्रतिब्रूयुः ततो यजमानः ॐ स्वस्ति इति त्रिरेव त्रिर्ब्रूयात् तेच ॐ स्वस्ति यजमा
नस्येति त्रिर्ब्रूयुः एवं कर्माणि २ ऋद्धिः ३ शान्तिरिति ततो ब्राह्मणाः ॐ पुनंतु मा १ ॐ
स्वस्ति नः इंद्रः २ ॐ यथेमां वाचं ३ सत्यमस्त्वृद्धिः ४ ॐ द्यौः शान्तिरिति पंचमंत्रान्पठेयुः ततो
ब्राह्मणेभ्यो दक्षिणादानं इदं स्वस्तिवाचनं रूपनारायणीये कलशस्थापनपूर्वकमुक्तं तत्र ब्रा
ह्मणपूजनानंतरं कलशं स्थाप्य प्रार्थयेत् ततः पुण्याहवाचनमिति विशेषः इति पुण्याह
वाचनम् अथ मंडपनिर्माणं ॐ तत्सद्य अस्मिन्शुभाकरिष्यमाणामुककर्माधारमंडपनिर्मा
णमहं करिष्ये इति संकल्प्य ॐ वेद्यौ विश्वदेव इति वाराहं १ ॐ नमोस्तु सर्पेभ्य इति शेषं २ ॐ सु
पर्णः पार्जन्य इति कूर्मं ३ ॐ स्योना पृथिवी इति पृथिवीं ४ प्रपूजयेत् ततः पृथिव्यै बलिं दद्यात्
मंत्रः ॐ तन्नो भूर्भुवः स्वः खनित्र्यायनमः इति खनित्रं प्रपूजयेत् ततः ॐ देवस्यत्वा · नार्यसीति
मंत्रेण खनित्रमादाय ॐ अग्रहितिस्वाहेवीत्ति मंत्रेण वेद्या ऐशानकोणमारभ्य आवहत्वतश्चन्यं खनि
त्वाबाह्या ईशाद्या आदक्षिणावर्तनं खनेत् ततो खननक्रमेण षोडशावर्तेषु ॐ अग्ने जुषाणां नन्नाय भो
यत्स्वाहेति धूनयोरं दत्वा हरिद्राद्धि हर्वी ततो स्त्रवल्लिपेत् ततः ॐ उद्धूय स्ववनस्पते इति स्तं
भमुत्थाप्य ॐ ह्रीं ह्रूं रूपणाइ स्मेतेनावहेत्यारोप्यावर्तं स्तंभाग्रनाह रयेत् ततः सशिखं मंडपं रचय

© Dharmartha Trust J&K. Digitized by eGangotri

प्र.
ग्र.प.
२९
39

वयेत् इति मंडपनिर्माणम् अथ मंडपसंस्कारे मंडपदेवतास्थापनं पूजनं मातृपूजनं मंडपाभावे
वेदोद्दिष्टमातृणामेव पूजनम् अविघ्नपूजनादीनां निवृत्तिरिति तत्र मंडपदेवतास्थापनं पूजनं च ।
अविघ्नो मंडपस्यैव मातृणां पूजनं सकृत् वेदस्थदेवैव साधारणानादौ आह मनःपरमिति तत्र सर्वादौ
एव अविघ्नस्थापनमिति पाद्य मोदादिषड्विनायकाः पूज्याः तत्र प्रकारः तंडुलपूरितसुवर्णमयपात्रे ।
पतिताग्रादिपात्रे निधाय तत्र मोदादिषड्विनायकानां तंडुलकुंकुमादिभिः इति सो विरच्य पूर्व
सकृद्धानाम मंत्रेण पूजयेत् गाकूटे यणाबेंबादितः कृत्वा भूर्भुवः स्वस्ततः परम् चतुर्थ्यंतेन स्वकेना
मनमन्त्रेते प्रयोजयेत् मूलमंत्रः समाख्यातः सर्वपूजाविधायक इति ॐ भूर्भुवः स्वः मोदाय नमः
मोदमावाहयामि भगवन् मोद अत्रागच्छ इह तिष्ठ एवं प्रमोदं सुमुखं दुर्मुखं अविघ्नं विघ्नकर्ता
रं स्वस्वमूलमंत्रेण आसनाद्युपचारैः पूजयेत् ॐ भूः मोदादिषड्विनायकेभ्यो नमः इति सकृदाप्
जयेत् अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम् न मम इति इति विघ्नपूजा मंडपस्यैव मि
ति मंडपस्य पूजा इत्यर्थः अथ मंडपपूजा ॐ भूः वसुधायै नमः इत्याग्नेयकोणस्थूणां पूजयेत् ॐ
भूः भद्रायै नमः इति नैरृत्यकोणस्थूणां पू० ॐ भूः आदित्यै नमः वायव्यकोणस्थूणां पू० ॐ
भूः नंदायै नमः इत्यैशानकोणस्थूणां पूजयेत् इत्यंतर्वेदिकास्थूणां पूजनम् अथ मंडपस्थूणा
पूजनम् ॐ भूः भूम्यै नमः इति मंडपाग्नेयकोणस्थूणां पूजयेत् ततः क्रमेणामरसस्तैः २ सर्वसंख्या

२९

यै॰ ३ मध्यसंध्यायै॰ ४ पश्चिमसंध्यायै॰ ५ गायत्र्यै॰ ६ सावि
त्र्यै॰ ७ बृहस्पत्यै॰ ८ अदित्यै॰ ९ विनतायै॰ १० पूर्णमास्यै ११ सिनी
वाल्यै॰ १२ पूजयेत् स्वस्वमूलमंत्रै ततः ॐ भू॰ वलिकाभ्यो नमः
इति वलिकाः पूजयेत् ॐ भू॰ वन्धनेभ्यो नमः इति वंधनानि पू
जयेत् ॐ भू॰ तिर्यक्काष्ठेभ्यो नमः इति तिर्यक्काष्ठानि पूज
येत् ॐ भू॰ शिखराय नमः इति शिखरं संपूजयेत् ततो मातृः पूजा
नपद्या ततो रोचनमानयन्त्या पट्टसूत्रहर्वां शालात्रयं ॐ वसोः प
वित्रमिति मंत्रेण तैलारोपणं ततो हरिद्राकुंकुमादिसुगंधद्रव्येण ॐ अद्भिर्हिविभोगैरिति मंत्रेण ।
तदुद्वर्तनम् ॐ निकामे निकामेति मंत्रेण स्नापोदकस्नपनम् ॐ दधिक्रा वा इति दध्यक्षतचंदन ।
लेपनम् ॐ या ओषधीति तान्यपकषायोदकस्नानं ॐ स्थिरो भव वीडु॰ इति पञ्चायाग्रे यस्तंभोपरिस्थापनं
एवं नैरृत्यवायव्यैशानकोणेषु कार्यं ततः पञ्चमीं शालावोटहीला ॐ कांडात्कांडादिति कंडनम्
ततो या ओषधी इति मंत्रेण षष्ठीं शहीला ॐ स्थिरो भव वीडु इति मंत्रेण तां मध्ये स्थापयेत् ततोऽलंत
शुक्तेषु नन्दनी नलिनी माता उमा वपश्च वह्निनीति पंचमं उपः मातरः पूज्याः ततः अभूतजलस्य
नरीति पादलिखितमतिमाहवा मत्सी कूर्मी वाराही मांडूकी मगरी ग्राहिकी क्रौंचकीति सप्त

© Dharmartha Trust J&K. Digitized by eGangotri

मातरष्टस्माः ततो लिखितप्रतिमासु ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा
इति सप्तस्थलमातरः ततो द्वारमातरः दक्षिणभागे प्रतिमासु भुजंघंती मंगला पिंगला इति वा
मभागे प्रानेरवर्द्धिनी महालक्ष्मी महाकालीति मंडपमध्ये कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा
क्रियामतिर्लज्जा शांतिस्तुष्टिः कीर्तिरिति द्वादश पूजयेत् ततो गोर्ध्यादिषोडशमातृपूजनम्
ततः वैश्वदेवं कुर्यात् ततो वसोर्धारा कार्या ततः षडैवतं नवदैवत्यं द्वादशदैवत्यं सांकल्पिकं
वा स्वशक्त्याभ्युदयिकं कुर्यात् ततो मंडपप्रवेशः पूर्वदिने मंगलस्नानं ततो मंडपप्रवेशः गणा।
पतिपूजनं प्रतिज्ञा पंचगव्यकरणं सर्षपविकरणं मंडपदेवतास्थापनं पूजनं तेभ्यो बलिदानं।
कृत्वा गणपतिसूर्यादिदेवतास्थापनपूजनमारभेदित्यनुक्रमेण कर्मारभेत् ततो मंडपपश्चि
मद्वारेण बहिर्निर्गत्य पूर्वदिग्गादिक्रमेण द्वारतोरणपूजामारभेत् ततः प्राच्यां ॐ भूः स्वः ऋग्वेद।
तोरणाय नमः इति तोरणं पूजयेत् अत्रस्थितो रणे नयतं रक्ष सर्वविघ्नान्निवारयेति प्रार्थयेत्
त्रिशूले वैस्थानं द्वारपादक्षिणस्तंभे ऐंद्रध्वजानारंभगमस्य ॐ भूर्भुवः इंद्राय नमः इतींद्रादीन्पूजयेत्
वैष्णवयागादौ तद्वच्चक्रगदापद्मानक्रमशस्तत्त्वमूलमंत्रेण पूजयेत् ततो द्वारशाखयोर्ध्रुवमध
रं चेति वस्तुद्वयमस्य पूजयेत् ततः शाखयोर्मूलयोर्धाम्बुराश्यपरिमशांतशिशिर नामानौ रत्ना।
गर्भौ वस्त्राच्छन्नौ नानालंकारशोभावपिहितौ त्रिसूत्रीवेष्टितौ कलशौ भूरसि धाम्यमसि स्राजित्रकल

© Dharmartha Trust J&K. Digitized by eGangotri

शामिति क्रमेण प्रतिष्ठाप्य तयोर्दक्षिणवामक्रमेणैरावतमभ्रमुं स्वस्वमंत्रेण पूजयेत् ततो द्वा
रमध्ये पूर्ववत्कलशं संस्थाप्य इंद्रं पूजयेत् तत्र प्रकारः अक्षतान् गृहीत्वा पठेत् हि सर्वामरसिद्ध
साध्यैरभिष्टुतो वज्रधरामरेशः संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्महेन्द्र ॐ त्रातारमि
ति ॐ भूः भगवन्निंद्र इहागच्छ इह तिष्ठ ॐ त्रातारमिति इंद्रं पूजयेत् ततो येंद्र इति दंडं गृहीत्वा पठन्मा
न्त्रेति ततस्त्रातारमिति पीतध्वजपताकाकरं गणे ऐरावतस्थं पीतवर्णं सहस्राक्षं दक्षिणवाम
हस्तस्थवज्रोत्पलमिंद्रं ध्यात्वा इंद्रः सुरपतिश्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै
नित्यं नमो नमः इति नत्वा त्रातारमिति दीपगंधजलाक्षतपुष्पयुतबलिं गृहीत्वा ॐ भगवन्निंद्र
इमं माषभक्तबलिं भक्षयस्व रक्षय बलिः सांगाय सपरिवाराय सायुधाय इंद्रदेवताये नमः ततो
याचेत् शचीपते गजारूढ वज्रहस्त सुराधिप पूर्वावकाशां पुष्पाभिरक्षणीयं प्रयत्नतः इति
ततः पूर्ववत्कलशं संस्थाप्य तत्र ऋग्वेदं पूजयेत् अग्निमील इति तत्र शांतिसूक्तजपार्थं सर्वविघ्नहृदय
मेकं ब्राह्मणं वा यातं तेन पाठयेत् ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः अत्रिगोत्रस्तु विप्रेंद्रः स्तवि
के मे मम वै भव इति ततस्त्वावाहयेत् इति पूर्ववत्पूजा ततस्त्वाग्नेयकोणे गत्वा पूर्ववत्कलशं स्था
पयेत् तस्मिन्द्रौडरीके कपिलां वमममूलेनाभ्यर्च्य पूर्ववत्कलशं संस्थाप्य तत्र पर्यग्निमावाहयेत् पठे
त् हि सर्वामरहव्यवाहमुनिप्रवीरैरभिष्टुतोभिजुष्ट तेजोवता लोकगणेन सार्धं ममाध्वरं रक्ष कवेन

© Dharmartha Trust J&K. Digitized by eGangotri

मस्ते अग्न आयाहि ॐ भूः भगवन्नग्ने इहागच्छ इह तिष्ठ अग्न आयाहि इत्यग्निं पूजयेत् नमो अग्नि
इति रक्तध्वजपताकां कुर्यात् ततः छागस्थं रक्तं दक्षिणवामकरस्थशक्तिकमण्डलुं रक्तोपवीती
नं ध्यात्वा सर्वदेवमयो देवो रक्तो वह्निर्महाबलः सप्तजिह्वो महावीर्यो नमो वैश्वानराय ते इति
नत्वा नमोऽग्नये पूर्ववद्बलिं दत्वा भो भगवन्नग्ने इमं माषभक्तिबलिं भक्षयन्त्वेतत्पुष्पबलिः सां-
गाय सपरिवाराय अग्नये समर्पयामि ततः प्रार्थयेत् नमस्ते अग्निरूपाय नमो वैश्वानराय ते वेदाय
वेदरूपाय नमस्ते हव्यवाहिने इति ततश्चाचमनम् इत्यग्निपूजा ततो दक्षिणे गत्वा ॐ भूः सुभद्रतो-
रणाय नमः इति तोरणं पूजयेत् ॐ तुंबुरुतोरणेनेयत्ते रक्ष सर्वविघ्नान्निवारयेति प्रार्थयेत् ततः
स्तंभे पूर्ववत् मूलेन नमः १ मित्राय नमः २ वरुणाय नमः ३ इति पूजयेत् ततो द्वारशाखयोः सोमाय
नमः १ आपाय नमः २ इति वस्त्रद्वयमर्पयेत् द्वारशाखामूलयोः पर्जन्याशोकनामानौ क-
लशौ पूर्ववत्प्रतिष्ठाप्य तयोर्वामने पिंगलां च पूजयेत् ततो द्वारमध्ये पूर्ववत्कलशं प्र-
तिष्ठाप्य यमं पूजयेत् एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभनन्दप्र-
दामधीशाशिवाय नमः पाहि मां त्वं नमस्ते यमाय त्वेति ॐ भूः भगवन् यम इहागच्छ इह ति-
ष्ठ इत्यावाह्य यमाय त्वेति यमं पूजयेत् यमाय त्वेति कृष्णध्वजपताकां कुर्यात् ॥
॥

© Dharmartha Trust J&K. Digitized by eGangotri

ततोमहिषारूढंधूम्रदंडपाशहस्तिनं वामकरमंसनपर्वततनस्मरूपमग्निसमलोचनंयमंध्या
त्वा दंडहस्तंयमंदेवंधर्मात्मानंमहाबलं आवाहयेद्धर्मराजंतेजोभिश्चैतपतेनम इतिनत्वा यमाय
त्वा इतिपूर्ववद्बलिंगृहीत्वाओंभगवन् यमइमंबलिंगृह्णममाधर्मेरत्नपदममाषभक्तबलिः सां
गायसपरिवारायसायुधाययमायनमः प्रार्थना वैवस्वतमहाबाहोनमस्तेधर्मसाक्षिणे।
शिवात्तापिहितोदेवदिशांरक्षकोभवान् इतितत्रपूर्ववत्कलशंस्थाप्य तत्रपञ्चरत्नंबद्ध्वंपूजये
त् इषेत्वेति तत्रशांतिसूक्तंजपार्थमृत्विग्द्वयमेकंवानियोजयेत् तेषांदद्यात् कानरालोयज्ञवेद
वेदेषमोविश्वदेवतःकाश्यपेयसलविप्रेंद्रस्वनिर्कमेममविभव इतिततस्तत्राचमनम् इतिदक्षिणा
हारपूजा ततःनैरृत्यांगत्वापूर्ववत्कलशंस्थाप्य तत्रकुमुदमन्त्रयमोपपूज्य ततःपूर्ववत्कल।
शंस्थाप्यतदुपरिनिरृतिंपूजयेत् पद्मेद्धिरक्षोगणनायकस्त्वंविशालवैतालपिशाचसंघैः ममा।
धरेयाहिशुभाधिनाथलोकस्यरक्षभगवन्नमस्ते अप्सुत्वेनमिति ॐभूः भगवन्निरृतेइहागच्छ।
इहतिष्ठ इत्यावाह्यअप्सुत्वेनमितिनिरृतिंपूजयेत् अप्सुत्वेनमितिनिकृत्तध्वजपताकोच्छ्रयणम्
ततोनरारूढंखड्गहस्तंनीलवर्णंमहाबलंमहाकायंबहुराक्षससंयुतंनिरृतिंध्यात्वा सर्वर
क्षाधिपोदेवोनिरृतिर्नीलविग्रहः खड्गवर्मधरोनित्यंनैरृतायनमोनमः इतिनत्वा अप्सुत्वे
नइतिपूर्ववद्बलिंगृहीत्वाओंभगवन्निरृतेइमंमाषभक्तबलिंमत्प्रयत्नेरत्नपदमभक्तबलिः सांग

© Dharmartha Trust J&K. Digitized by eGangotri

सु॰
य॰प॰
८२

यस्मपरिवारायसायुधायनिरृतयेनमः प्रार्थना गतसेमोहिवङ्गार्थेभगवानत्रप्रतिष्ठितः ति-
विघ्नायत्तभूमिंत्वंकुरुष्वशववाहनइति ततश्चाचमनम् इति निरृतिपूजा ततःपश्चिमेगवा-
ॐभूःभूमायतोरणायनमः इतितोरणंपूजयेत् ललतोरणेनपत्तेरत सर्वविघ्नानिवारयेतिप्रा-
र्थयेत् स्तंभेगणपूर्ववत् अर्घमणेनमः १ अंशनेनमः २ विवस्वतेनमः ३ इतिपूजयेत् द्वारशा-
खयोः अनिलायनमः अनलायनमः इतिवस्त्रद्वयमर्चयेत् द्वारशाखयोमूलयोःपूर्ववत् जीव-
नामस्तनामानौकलशौप्रतिष्ठाप्य अनन्ततासुपर्णौवमूलमंत्रेणपूजयेत् द्वारमध्येकलशंप्र-
तिष्ठाप्यवरुणंपूजयेत् इमंमेवरुण, यैहिपादोगणावारिधीनांगणेनपर्जन्यसहायसरो-
भिः विद्याधरैरप्सरगीयमानपाहित्वमस्मिन्भगवन्मखेत्ववरुणास्यांतंभनमिति ॐभूःभग-
वन्वरुणैहागच्छइहतिष्ठ इत्यावाह्यपूजयेत् इमंमेवरुण इतिस्थितध्वजपताकाकुर्यात् ततः
मकरारूढंपाशहस्तंकिरीटिनंश्वेतवर्णंवरुणंध्यात्वा पाशहस्तंचवरुणंयादसांपतिमीश्व-
रं आवाहयामियज्ञेस्मिन्वरुणायनमोनमः इतिनत्वाइमंमेवरुण इतिपूर्ववद्बलिगृहीत्वाभोभ-
गवन्वरुणइमंबलिंभक्षयतेरक्तपयमाषभक्तबलिः सांगायसपरिवारायसायुधायवरुणाय
नमः ततःप्रार्थना अपांपतिस्त्वमायोवेदेवैदेवनिगायसे शमनयाश्रुविघ्नानिनमोमकरवा-
हनइति॰ ततःपूर्ववत्कलशंस्थाप्यतत्रसामवेदंपूजयेत् अग्नआयाहीतिततोऽस्मिन्दिग्येमके-

© Dharmartha Trust J&K. Digitized by eGangotri

वायुमंत्रेणार्घयेत् सामवेदस्त्रिपिंगाक्षो जागतः शक्रदेवतः भारद्वाजस्तु विप्रेंद्र ध्वजनिकेतन मम
वेभव इति ततः आचमनम् इति पश्चिमद्वारपूजा ततो वायव्ये गत्वा पूर्ववत्कलशं स्थाप्य तत्र पु
ष्पं दत्ते पुष्पं दत्तोच मूलमंत्रेण संपूज्य ततः कलशोस्थाप्य तदुपरि वायुं पूजयेत् पद्महियत्ते मा
मरुत्प्राणायमृगाधिपः रूढः महसिद्धसंघैः प्राणाधिपः कालगतेसमहाघः गृहाण पूजां भगवन्
नमस्ते वातो वा मन इति ॐ भूः भगवन्वायो आगच्छ इह तिष्ठ इत्यावाह्य आनो नियुद्भिरिति पूजये
त् वातो वा मन इति धूम्रध्वजपताकोत्कुशपाणिम् ततो मृगारूढं विप्रांबरधरं युवानं वरध्वजधर
दक्षिणवामहस्ते धूम्रवर्णं वायुं ध्यात्वा प्रनाकारो महेजाश्चपश्चाद्दृष्टिगतिर्भुवि तस्मै पूजा यः।
जगतो वायवे इन्नमामिते इति नत्वा वातो मन इति बलिं गृहीत्वा भो भगवन्वायो इमं बलिं मत्
यत्नेन रक्ष पंचबलिः सोमाय सपरिवाराय वायवे नमः ततः प्रार्थना प्राणिनां प्राणरूपस्त्व
महाबलपराक्रम महावेगमहारूढदिशं मत्पथं जन इति ततः आचमनम् इति वायुपूजा·
ततः ऊर्ध्वं गत्वा ॐ भूः स्वप्रभाय तोरणाय नमः इति तोरणं पूजयेत् न्यग्रोधतोरणेन यत्नेन रक्ष।
सर्वविघ्नान्निवारय इति प्रार्थयेत् श्रेयोभुलत्वन नमः १ सविघ्नेन नमः २ विघ्नेश्वेन नम इति पूजयेत् त
तो द्वारशाखयोः मत्स्याय नमः १ प्रभासाय नमः इति ब्रह्महृदयमर्चयेत् द्वारशाखायां मूल।
योर्धन दक्षिणपदन्तामां नैऋत्ये पूर्ववत्कलशं प्रतिष्ठाप्य सार्वभौमं मंत्रं तत्र च मूलमंत्रेण पूजयेत्।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र०
य० प०
४२

43

द्वारमध्ये पूर्ववत्कलशे स्थाप्य सोमं पूजयेत् एह्येहि यज्ञेश्वर यज्ञरक्षो विधत्स्व नक्षत्रगणेन सा-
र्द्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते यवं थं सोम इति ॐ भूः भगवन्
सोम इहागच्छ इह तिष्ठ इत्यावाह्य यवं थं सोम इति सोमं पूजयेत् वयं थं सोम इति स्ववर्णे वर्णे
पताकोच्छ्रयणम् ततः श्वेतवर्णे श्वेताश्वसंस्थं गदावरधरं दक्षिणावामकरे किरीटिनं ध्यात्वा ।
सर्वनक्षत्रमध्ये तु सोमो राजाय काशितः नमो देवाय सोमाय नक्षत्रपतये नमः इति नत्वा व-
यं थं सोम इति पूर्ववद्बलिं गृहीत्वा भो भगवन्सोम इमं बलिं भक्षय मे रक्ष एष बलिः सोमाय स-
परिवाराय सायुधाय सोमाय नमः ततः प्रार्थना शालेयो सोम महारूप नक्षत्राणामधीश्वर ॐष-
धीनां प्रभो रक्ष उदीचीं समाहित इति कुवेरश्वेत नत्रस्थापितसद्रा एह्येहि यक्षाधिपते कुवे-
र सहैव यक्षाप्सरसां गणेन विमानमारुह्य दिशं प्ररक्ष गृहाण पूजां भगवन्नमस्ते कुवेदगव
य इति ॐ भूः भगवन्कुवेर इहागच्छ इह तिष्ठ इत्यावाह्य कुवेदंगवय इति कुवेरं पूजयेत् राजा-
धिराजयेति हरितध्वजपताकोच्छ्रयणं ततो नरयुक्तपुष्पकविमानस्थं कुण्डलहारकेयूरसंशो-
भितवरगदाधरदक्षिणवामहस्तं शुकटिनं महोदरं महाकायं ह्रस्वपिंगनेत्रं पीतविग्रहं शिव-
सखायं कुवेरं ध्यात्वा सर्वयक्षाधिपो देवः पिंगलः पीतविग्रहः धनाध्यक्षो महाकायस्तस्मै नि-
त्यं नमो नमः इति नत्वा कुवेदगवय इति पूर्ववद्बलिं गृहीत्वा भो भगवन्कुवेर इमं माषभक्तबलिं ।

© Dharmartha Trust J&K. Digitized by eGangotri

मन्त्रयन्तेऽस्त्व एष बलिः सांगाय सपरिवाराय सायुधाय कुबेराय नमः प्रार्थना गृह्यकेश-
धनाध्यक्ष शिवमित्र गणेश्वर पूजां गृहाण यक्षेश्वर दिशो रक्षकोऽभवान् इति ततः पूर्ववत्कलशं
स्थाप्य तत्राथर्ववेदं पूजयेत् शन्नोदेवीरिति तत्र सक्षिगह्वयमेकेवाहूत्वा तत्र सार्घ्येयेत् बृहस्पतिरथर्व-
वेदोऽन्त्यभूः रुद्रदैवतः वैशम्पायन विप्रेन्द्र सक्षिकेमे मखे भव इति ततश्चाचमनम् इस्त्रेयरहाय पूजा
ततरीशाने गत्वा पूर्ववत्कलशं स्थाप्य स्वप्रतीकमेनं नीवतीवमूलमन्त्रेण संपूज्य ततः कलशे
स्थाप्य तदुपरि ईशं पूजयेत् एह्येहि विश्वेश्वर त्रिशूलकपालखट्वांगपाणे सार्द्धं लोकेश लोकेश्व-
र यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते नमः शंभायेति ॐ भूः भगवन्नीशान इहागच्छ इह तिष्ठ स्वा-
काय नमीशानमिति पूजयेत् श्वेतध्वजपताकोक्तयुक्ते ईशावास्यमिति हृषीपाशूपं वरदं त्रिशूलयुत-
दक्षिणवामहस्तहृदयेषि नेत्रशुद्धस्फटिकवर्णमीशानं ध्यात्वा सर्वाधिपो महादेव ईशानः शुक्ल-
विग्रहः शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः इति नत्वा ईशावास्यमिति पूर्ववद्बलिं दत्त्वा
ॐ भगवन्नीशान इमं बलिं भक्षयन्तेऽस्त्व एष बलिः सांगाय सपरिवाराय सायुधाय ईशानाय नमः
वृषस्कन्धसमारूढ त्रिशूलहस्त त्रिलोचन आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतामिति इतीशानपू-
जा ततो नैरृतिपश्चिममध्ये ब्रह्माणं पूजयेत् तत्र पूर्ववत्कलशं स्थाप्य एह्येहि सर्वाधिपते सुरेन्द्र
लोकेन सार्द्धं पितृदेवताभिः सर्वस्य धातास्यमितप्रभावो विशाध्वरं नो भगवन्नमस्ते ब्रह्मरूपा इति

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
य॰प॰
८८

44

ॐ भूः भगवन्ब्रह्मन्नागच्छ इह तिष्ठ इत्यावाह्य ब्रह्मणे नम इति पूजयेत् रक्तध्वजपताकोच्छ्रयणं
श्रां ब्रह्मन्निति मन्त्रपूर्वं ब्रह्मा हंसारूढमक्षमालाकमण्डलुधरोर्ध्वाधोदक्षिणकरद्वयं स्रुवकमण्डलु।
धरोर्ध्वाधोवामकरद्वयं शास्त्रलेखनदिलिलेखोदरं रक्तवर्णं ब्रह्माणं ध्यात्वा पद्मयोनिश्चतुर्मूर्ति।
र्वेदावासः पितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः इति नत्वा श्रां ब्रह्मन्निति पूर्ववद्ब।
लिं गृहीत्वा ॐ भगवन्ब्रह्मन्निमं बलिं भक्त्या दत्तं गृहाण एष बलिः सांगाय सपरिवाराय सायुधा
य ब्रह्मणे नमः प्रार्थना पितामह जगत्स्रष्टः कमलेश शर्व्वाम भूषिण ॐ नमस्ते यजनमस्तु भ्यं रतं त्व
द्भिमसाध्यं इति ततस्तां वमनम् इति ब्रह्मपूजा ततः पूर्वे स्नानयामे ध्येः पूर्ववत्कलशे स्थाप्य अनं
तं पूजयेत् एह्येहि पातालधराधरेशनागनागकिन्नरगीयमान यक्षोरगेन्द्रामरलोकसंघैरनं
तरत्नाकरमस्मदीयं नमस्तु सर्पेभ्यः इति ॐ भूः भगवन्ननन्तानागच्छ इह तिष्ठ इत्यावाह्य नमो।
स्तु सर्पेभ्य इति पूजयेत् मेघवर्णध्वजपताकोच्छ्रयणं अं येगोविति ततोऽनन्ते शयनासीनं।
फणासप्तकमण्डिते पद्मपृष्ठे धरोर्ध्वाधो दक्षिणकरं चक्रगदाधरोर्ध्वाधोवामकरं नीलवर्णं।
मनन्तं ध्यात्वा योसावनन्तरूपेण ब्रह्माण्डं सचराचरं पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः इ
ति नत्वा नमोस्तु सर्पेभ्यः इति पूर्ववद्बलिं गृहीत्वा ॐ भगवन्ननन्त इमं बलिं भक्त्या दत्तं गृहाण एष बलिः सां
गाय सपरिवाराय सायुधाय अनन्ताय नमः प्रार्थना अनन्तनाग अनन्तस्त्वं फणीन्द्राधिपते हरे व

© Dharmartha Trust J&K. Digitized by eGangotri

याम्यदक्षिणे कार्यं कृष्णे नैऋत्याय ते नमः इति ततश्चाचमनम् इति दिक्पालपूजा आचम्य मण्ड
पमध्ये स्तम्भवेदिं दशहस्तदीर्घं पञ्चहस्तोच्छ्रितं पञ्चहस्तदीर्घं त्रिहस्तायतं वा चामरकिंकि
मादियुतं पञ्चवर्णं महाध्वजमुच्छ्रयेत् घोदंड इति देवगृहाणां इत्यष्टसहस्रमन्त्रस्य व्यापनं तत्र ब्रह्म
पूजने ब्रह्मजज्ञानमिति ततो मण्डपाच्छादने मर्माणीति ततो मण्डपाद्बहिः पूर्वभागे सर्वभूत
बलिदाने तत्र प्रकारः पूर्वभागे उपलिप्तभूमौ उपविश्य त्रैलोक्ये यानि भूतानि स्थावराणि च
राणि च ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ऋष
यो मनवो गावो देवमातर एव च सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ब्रह्माविष्णुश्च रुद्रश्च
लोकपालैर्गणैः सह रक्षन्तु मण्डपं सर्वं त्वं तु रक्षोऽसि सर्वतः इति पठित्वा ॐ भूः ब्रह्मणे नमः इत्येवं
विष्णवे शिवाय देवेभ्यो दानवेभ्यो गन्धर्वेभ्यो यक्षरक्षेभ्यः पन्नगेभ्य ऋषिभ्यो मनुभ्यो गोभ्यो मातृ
भ्यो नमो नमः मन्त्रेण संपूज्य भूमौ माषभक्तबलिं दद्यात् ततो यजमानः आचार्यप्रमुखैः कृत्वा भद्रं।
कर्णेभिरिति पठित्वा मण्डपं प्रदक्षिणीकृत्य ऋत्विग्भिः सह पश्चिमद्वारेण मण्डपं प्रविशेत् ततो
वास्तुपूजनमारभेत् इति मण्डपपूजा अथ वरणप्रयोगः तत्राचार्यावाहनम् आचार्यस्तु यथा
स्वर्गे शक्रादीनां बृहस्पतिः तथैव मम यज्ञेऽस्मिन्नाचार्यस्त्वं भव प्रभो ॐ बृहस्पते इति अतियदर्यः अ
थ ब्रह्मावाहनम् यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजो

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र०
य०प०
७५

45

नम ॐ ब्रह्मयत्नानम् अथर्त्विजावाहनम् ऋग्वेदः पद्मपत्राक्षो गायत्रच्छन्दोऽग्निर्देवतः अत्रिगोत्रा
त्वविप्रेंद्र ऋत्विक्त्वमेमम भव १ ॐ अग्निमीले पुरो० कांतरक्तो यजुर्वेदस्त्रिष्टुप्छन्दो रुद्रदेवतः भारद्वा
जस्त्वविप्रेंद्र ऋत्विक्त्वमेमम भव १ ॐ इषेत्वा० सामवेदस्तु पिंगाक्षो जागतः शाक्रदेवतः काश्यपश्चै
व विप्रेंद्र ऋत्विक्त्वमेमम भव १ ॐ अग्न आयाहि वीतये० बृहन्नेत्रो अथर्ववेदोऽनुष्टुप्छन्दो रुद्रदेवतः वैश्वा
मायन विप्रेंद्र ऋत्विक्त्वमेमम भव १ ॐ शन्नो दे० ततो जापकानां वरणम् तत्र वाक्यम् वरणद्रव्य
मादाय ॐ तत्सदद्येह० अमुकप्रवरान्विताः अमुकगोत्रोऽमुकशर्मा० अमुकप्रवरान्विता० क
कगोत्रो यजमानः अमुकवेदान्तर्गताः अमुकशाखाध्यायनम् अमुककर्मण्यमुकत्वेनाहम्मृणे वृतोस्मी
ति० प्रत्युक्तिः एवं सर्वत्र अनेन वरीतारं आम्रातोतीति पठेयुः यदावधं इति कंकणबंधनम् एवं ऋत्वि
जो वृत्वा मधुपर्कं कुर्यात् मधुपर्कपूजनं वरस्य शिष्टसंप्रदायः मधुपर्कपूजने यजमानेनाचा
र्यादाचार्यस्यैव मधुपर्कपूजनं सोमेन यक्ष्यमाणः ऋत्विजस्तदिच्छा ग्रहयाग सोमयाग एव ऋत्वि
क्पूजनमिति दिक् अथ मधुपर्कः तद्यथा कर्ता स्नातोऽनन्तः कुशोपग्रहपाणिः पीठ उपविश्य अ
मुकोऽहमस्मिन्ग्रहयागकर्मणि हृतस्याचार्यस्य तत्करणाबोक्प्रकारेण मधुपर्केणार्चनं क
रिष्ये इति संकल्पः ॐ साधु भवानास्ताम् अर्चयिष्यामो भवन्तमित्याचार्यमभिमंत्र्य ततः पंचविं
शतिकुशान्निर्मितं विष्टरं गृहीत्वा ॐ विष्टरो३ इत्युक्ते विष्टरः प्रतिगृह्यतामित्याचार्याय निवेदयेत्

© Dharmartha Trust J&K. Digitized by eGangotri

अर्घ्यं ब्रह्मन्नसौ प्रतिगृह्य वर्ष्मोस्मीत्यस्याथर्वण ऋषिरनुष्टुप्छन्दो विष्टरो देवता उपवेशने वि-
नियोगः ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदास-
ति इति मन्त्रेण दक्षिणाग्रविष्टरमासने निधाय तत्रोपविशति ततः पाद्यं ३ प्रतिगृह्यतामिति पाद्य-
मुदकमर्घ्याय निवेदयति अर्घ्यं ब्रह्मन्नसौ प्रतिगृह्य तत्पात्रं भूमौ निधायाञ्जलिना जलमादाय।
दक्षिणं पादं प्रक्षालयति ब्राह्मणः क्षत्रियादिर्वामं ॐ विराजो दोहोसि विराजो दोहमसि मयि
पाद्यायै विराजो दोहः इति प्रक्षाल्य पुनरनेनैव मन्त्रेण वामं पादं प्रक्षालयति पुनर्यजमानो वि-
ष्टरौ ३ प्रतिगृह्यतामिति यजमानदत्तं विष्टरं तूष्णीं प्रतिगृह्य वर्ष्मोस्मीति मन्त्रेण पादयोरधस्ता-
द्दत्वा तत्रोपविशति ततोऽर्घ्यो ३ प्रतिगृह्यतामिति अर्घ्यपात्रमर्घ्याय यजमानः प्रयच्छति ततः
आपस्थ इति प्रजापतिरृषिर्यजुश्छन्दः आपो देवता अर्घ्यग्रहणे विनियोगः ॐ आपः स्थ युष्माभिः
सर्वान्कामानवाप्नवानीति पठित्वार्घ्यः प्रतिगृह्य मूर्द्धपर्यन्तमानीय भूमौ प्रवाहयन्नभिमन्त्रय-
ते समुद्रं व इत्यस्याथर्वण ऋषिरनुष्टुप्छन्दः आपो देवता अर्घ्याभिमन्त्रणे विनियोगः ॐ समुद्रं वः
प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मा परासेचि मत्पय इति अर्घ्यं वर्जयित्वा।
आचमनीयं ३ प्रतिगृह्यतामित्याचमनीयपात्रं सोदकमर्घ्याय प्रयच्छति अर्घ्यश्च प्रतिगृह्य आ-
मागन्निति परमेष्ठी ऋषिर्बृहती छन्दः आपो देवता आचमने विनियोगः ॐ आमागन्यशसा सं-

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ब्रह्मवर्चसमसास्माकं कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनामिति सकृदाचम्य स्वानौ।
वमनं कुर्यात् अथ मधुपर्क्कौ १ इति शूद्रतामिति स्थापितं दधिमधुघृतं कांस्यपात्रं कांस्येन
पिहितमर्घ्यायनिवेदयति सच यजमानहस्तस्थितमुद्घाट्य मधुपर्कं विलोकयेत् मित्रस्य।
त्वेति बृहस्पतिऋषिर्यजुश्छन्दः मधुपर्को देवता मधुपर्कावेक्षणे विनियोगः ॐ मित्रस्यत्वा चक्षु।
षासमीक्ष इति प्रतीक्ष्य प्रतिगृह्णाति देवस्यत्वेति बृहस्पति ऋषिर्यजुश्छन्दः सविता देव।
ता मधुपर्कग्रहणे विनियोगः ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृ
ह्णामीति इति गृह्य सव्ये पाणौ निधाय दक्षिणहस्तस्यानामिकया मिश्रयति नमः श्यावेति प्रजाप
तिऋषिर्यजुः सविता देवता मधुपर्कालोडने विनियोगः ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं त
त्ते निष्कृन्तामि इति सकृदालोड्य सकृदनामिकाङ्गुष्ठाभ्यामादाय बहिर्निक्षिपेत् पुनरेवं विवार।
मालोडनं निष्कृन्तनं च कृत्वा त्रिः प्राश्नीति यन्मधुन इति कुत्सऋषिर्जगती छन्दो मधुपर्को देवता।
मधुपर्कप्राशने विनियोगः ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमे
ण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि इत्यनामिकाङ्गुष्ठाभ्यामादाय त्रिः प्राश्नाति मधुवाता।
ऋतायत इत्याद्याभिस्तिसृभिर्वा प्रत्येकं प्राश्नाति प्राशितशेषं पुत्राय यान्तेवासिने वोत्तरतन्नवा
सीनाय दद्यात् सर्वं वा प्राश्नीयात् शेषं स्याद्धिसञ्चरे देशे वा निक्षिपेत् ततः स्मार्तविधिना।

वर्ष्मोगमन्तुपस्पृश्य पाति संहिताभिरङ्गुलीभिर्मध्यमानामिकाभिः वाङ्म आस्येऽस्त्विति मुखं स्पृशेत्
अंगुष्ठप्रदेशिनीभ्यां नसोर्मे प्राणोऽस्त्विति नासिकारंध्रद्वयं अंगुष्ठानामिकाभ्यां अक्ष्णोर्मे चक्षुरस्त्वि
ति चक्षुषी तथैव कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ संहिताङ्गुलिपाणिभ्यां ऊर्वोर्मे ओजोऽस्त्विति अ
रिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरःप्रभृति पादांतानि सर्वाण्यङ्गान्यालभेत अथेह कृतस्य
मधुपर्केणार्चनस्य साद्गुण्याय साङ्गता अथ सामान्यार्चनम् गंधपुष्पाक्षतजलैः संयुतो दवरपात्र
मादाय ॐ तत्सद्य ब्रह्मादि देशकालसंकीर्तनेनैकनामपूर्वेण विशेषणविशिष्टायां तिथौ सकल
नमोऽहं करिष्ये इति संकल्प्य इमं वार्यं प्रयच्छामि इत्युक्त्वा यथीतिमानसाः पादयेत्तु चमोनिमे स्तयेन्नमनो
रथान् स्वागतं वो द्विजश्रेष्ठा मदनुग्रहकारकाः इमं मद्धोमिदं पाद्यं भवन्तः प्रतिगृह्णन्तो ततो गंधपुष्पा
दिभिर्वा पचारैः पूजयेत् तत्र मन्त्रब्राह्मणस्य पूर्वं गंधार्चने कृतना पार्थयीत अस्य मागस्य निष्पत्तो भ
वंतोऽभ्यर्थिता मया सुप्रसन्नाः प्रकुर्वन्तु शान्तिकं विधिपूर्वकं इति सामान्यार्चनम् दक्षिणादानं इति
संकल्प्य गोहिरण्यं वा यथाशक्ति दद्यात् एवं ब्राह्मणानामपि मधुपर्केणार्चनं दक्षिणाहारपालजापकयोश्च का
लावगास्यशोतनपवमधुपर्क इति कर्कभाष्ये स्थितं इति यजुर्वेदिनां मधुपर्कविधिः निष्क्रयभूतं दृष्टं
वा अथ सामवेदिनां मधुपर्कविधिः यथा विष्टरपाद्यमुदकमर्घ्यमाचमनीयमुदकं मधुपर्क कांस्यपा
त्रे दधिमधुघृतं कांस्येन पिहितं गां च गुरवे परिकल्प्य यजमानः प्राङ्मुखोपविष्टाय स्वस्तिजेविष्ट

© Dharmartha Trust J&K. Digitized by eGangotri

गृ०
प०प०
घ०

47

रो २ प्रतिगृह्येतामिति निवेदयेत् अर्घ्यस्य ओं अहं वर्ष्म सजातानां विद्युतामिव सूर्यः इदं तमधितिष्ठा
मि यो मां कश्चाभिदासतीत्यनेन मन्त्रेणोदगग्रयस्तयोरुपविशति पादाभ्यामाक्रमेद्वा ततः पाद्यं २
प्रतिगृह्यतामिति अर्चीयपाद्यं निवेदयेत् स च पाद्योदकमादाय दक्षिणपादं प्रथमं प्रक्षाल्य पश्चा
त् सव्यं प्रक्षालयेत् ततः अर्घो २ प्रतिगृह्यतामित्यर्घ्यं निवेदयेत् स चाञ्जलिना प्रतिगृह्य मूर्ध्नि पर्यन्ते
निनीय भूमौ तच्छेषं प्रक्षालयेत् अध्यावेपित्वा आचमनीयं २ प्रतिगृह्यतामित्याचमनीयं निवेदयेत्
अर्घ्यस्य अमृतोपस्तरणमसीति सकृदाचामेत् ततः शुद्धये त्रिलीहोरयुः प्रापरहिया चामेत् ततः।
आवाताय मधुपर्को २ प्रतिगृह्यतामिति मधुपर्कं निवेदयेत् अर्घ्यस्य हियमाणस्य घाहुरिते य।
जमानहस्तस्थितं मधुपर्कं ओं मित्रस्य त्वा चक्षुषा प्रतीक्षे इत्यवलोक्य ओं देवस्य त्वा सवितुः प्रसवे
श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति यजमानादञ्जलिना प्रतिसव्ये प्राणे कृत्वा ओं मधुवा
ता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः १ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः मधु
द्यौरस्तु नः पिता २ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ३ इति ऋचेन त्रिः
प्रदक्षिणमालोड्य ओं वसवस्त्वा गायत्रेण छन्दसा भक्षयन्त्विति तदेकदेशं मधुपर्कस्य दक्षिणभा
गे निक्षिपेत् आदित्यास्त्वा जागतेन छन्दसा भक्षयन्त्विति पश्चात् ओं विश्वे त्वा देवा आनुष्टुभेन छन्दसा भ
क्षयन्त्विति मध्ये निक्षिपेत् ततो मध्याद्गृहीत्वा ओं भूतेभ्यस्त्वेति त्रिरूर्ध्वं क्षिपेत् ततः विराजो दोहो

© Dharmartha Trust J&K. Digitized by eGangotri

सीति प्रथमं पादप्रक्षालनम् ॐ विराजो दोहमशीयेति द्वितीयं पादप्रक्षालनम् ॐ मयि दोहः पाद्यायै वि
राजो दोह इति तृतीयं पादप्रक्षालनम् तूष्णीं चतुर्थं पादं प्रक्षालयात् नचैतं नतिक्रामेत् शेषमुदगासीनाय ब्रा
ह्मणाय योऽक्लिष्टाधिकारिणे शूद्राय देयात् अप्सु वा प्रक्षिपेत् स्वयं वा प्राश्नीयात् अथ पुनरर्घमाचम्य
पुनराचमनीयेनाचामेत् ॐ अमृतोपिधानमसीति प्रथमं ॐ सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति
द्वितीयमाचमनं विदध्यात् ततो यजमानप्राञ्जलोदकायायार्घाय गौर्गौर्गौरिति गां निवेदयेत् स
च गृहीत्वा ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे ज
नाय मा गामनागामदितिं वधिष्टेति नपिबतापिबतूदकं तृणान्यत्तु त्वनेन इति ऋग्वेदिनां मधुपर्कविधिः
इदं वै प्राचार्यवत्सस्मृति ```` मधुपर्केणार्चयेत् एवमग्रे पितृश्राद्धमहादाने सामवेदिनः अन्वदार्घ्यं यवे
वेदिनः स्वस्वशाखीयविधिना मधुपर्कं चेत् तथाहि सामगशाखीयमधुपर्कविधिः अग्न्याद्यासा
नं तेन गामेकां बध्वा ग्रामाद्बहिर्द्वारादितो यजमानपुरुषाय तिष्ठेत् ततोऽर्घ्यपात्रेन मंत्रेण
गोकर्णस्थानं कुर्यात् ॐ अर्हणा ति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो रुद्रो देवता गोकर्णस्थाने विनियोगः
ॐ अर्हणा पुत्रवासस धेनुरभवद्यमे सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् इति इदमहमिति म
न्त्रस्य विशिष्ठ ऋषिः पंक्तिश्छन्दो विराड्देवता आसनोपवेशने विनियोगः इदमिति इदमिमांपद्यां
विराजमन्नाद्यायाधितिष्ठामि इत्युपविशेत् ततो यजमानपुरुषो विष्टरपाणिपार्घ्याचमनीयमधु

© Dharmartha Trust J&K. Digitized by eGangotri

पर्कानादाय त्रिस्त्रिर्निवेदयेत् यथा विष्टरो ३ इति गृह्यतामिति यजमानः प्रयच्छेत् प्रतिगृह्णामीति
चैनं गृहीत्वा पदकमुत्तराग्रमासनाधो न्यसेत् या ओषधीरिति विशिष्ठ ऋषिरनुष्टुप् छन्दः ओषधयो दे
वता आसनाधस्ताद्द्वितीय निधाने विनियोगः ओं या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ता
मह्यमस्मिन्नासने ऽच्छिद्राः शर्म यच्छत इति ततो द्वितीयं विष्टरं पादयोरधस्ताद्दाने विनियोगः
ओं या ओषधीरिति वसिष्ठ ऋषिः अनुष्टुप् छन्दः ओषधयो देवता द्वितीयविष्टरस्य पादयोरधस्ताद्दा
ने विनियोगः ओं या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म
यच्छत इति ततः पाद्यम् इति प्रतिगृह्यतामिति यजमानः प्रयच्छेत् प्रतिगृह्णामीत्यर्घं गृहीत्वा
वलोकयेत् ततो देवीरिति वसिष्ठ ऋषिः संकृतिश्छन्दः आपो देवता पाद्योदकावलोकने विनियोगः
ओं यतो देवी प्रतिपश्याम्यापस्ततो मा राध्यिरागच्छन्तु इत्यवलोक्य प्रश्नः स्वयमेव पूर्वं वामपादं प्रक्षा
लयेत् सव्यमिति वसिष्ठ ऋषिः प्रकृतिश्छन्दः श्रीर्देवता दक्षिणपादप्रक्षालने विनियोगः ओं दक्षि
णं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि इति ततः सव्येवामपादं सव्यं पूर्वं प्रक्षालयेत्
पूर्वमन्यमिति वसिष्ठ ऋषिर्विराट् छन्दः श्रीर्देवता उभयचरणप्रक्षालने विनियोगः ओं पूर्वमन्यमु
भौ पादाववनेनिजे राष्ट्रस्यर्द्ध्या अभयस्यावरुद्ध्यै इति ततो यजमानोऽर्घ्यस्य पादौ सव्यवर्णोदकेन प्र
क्षालयेत् ततोऽर्घो ३ इति गृह्यतामिति यजमानः प्रयच्छेत् अर्घ्यः प्रतिगृह्णामीति गृहीत्वा अत्रमस्य

48

© Dharmartha Trust J&K. Digitized by eGangotri

तिवसिष्ठऋषिर्धृतिश्छंदः अर्घ्यो देवता अर्घ्यग्रहणे विनियोगः ॐ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूया
सामिति अर्घ्योदकेन शिरोमार्जनं कृत्वा अर्घ्यं भूमौ स्थापयेत् ३ आचमनीयं ३ प्रतिगृह्यतामिति।
यजमानः प्रयच्छेत् प्रतिगृह्णामीति गृहीत्वा यशोसीति वसिष्ठऋषिर्यजुश्छंदः आचमनीयं देवता
आचमने विनियोगः ॐ यशोसि यशो मयि धेहि इति मंत्रेण सकृदाचम्य द्विस्तूष्णीं ततः स्नातोचने।
कुर्यात् मधुपर्को ३ प्रतिगृह्यतामिति यजमानः प्रयच्छेत् यशः ३ इति वसिष्ठर्षिर्यजुश्छंदः मधुपर्को
देवता मधुपर्कग्रहणे विनियोगः ॐ यशसो यशोसि॰ इति मधुपर्कं गृहीत्वा सव्यहस्ते कृत्वा द।
क्षिणहस्तेनोद्धृत्य त्रिवारं भक्षयेत् यशः इति वसिष्ठऋषिर्यजुश्छंदः मधुपर्को देवता प्राशने वि।
नियोगः सांगुष्ठकनिष्ठकया ॐ यशसो भक्षोसि महसो भक्षोसि श्रीभक्षोसि श्रियं मयि धेहि ता।
तः सांगुष्ठानामिकया पूर्वोक्तमंत्रेण प्राश्नीयात् ततः सांगुष्ठमध्यमयोक्तेनैव मंत्रेण प्राश्नी।
यात् ततः सर्वांगुलीभिस्तूष्णीं चतुर्थं प्राशयेत् शेषं ब्राह्मणाय वा दद्यात् ततः पुनराचामेत् प्र
क्षालितं ततस्मै ब्रूयात् गौर्गौर्गौरिति मुंचगामिति वसिष्ठर्षिर्बृहस्पतिश्छंदो गौर्देवता मोक्ष
णे विनियोगः ॐ मुंच गां वरुणपाशाद्द्विषंतमभिधेहि तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणा
नि पिबतूदकमिति पठित्वा गामुत्सृजेत् ततस्तत्स्थो यो गवि अर्हणीयो गवामभिमुखो जपेत् ॐ
माता रुद्राणामिति वसिष्ठऋषिस्त्रिष्टुप्छंदो गौर्देवता गोरभिमंत्रणे विनियोगः ॐ माता रुद्रा

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र॰
ध॰प॰
५९

49

णोऽहितावसतो ॐ स्वमादियानानामसतस्यनाभिः अग्ने वाचे विकितस्थेजनाय मासौ गामनागामः
दितिं वधिष्ठेत्यभिमंत्रयेत ततो व्रीहिसंदधेनत्वां गृहीत्वा विघात् मम अमुकशर्मणो ब्राह्मणा
स्यामुष्यामुकशर्मणो यजमानपाप्मानं हतेति ततो यजमानः अद्येहकृतमधुपर्केणार्चितस्य मा
दुल्पाप्यं इदं सुवर्णमग्निदैवतं ब्राह्मणाय संप्रददे इति संकल्प्य सुवर्णं दद्यात् इति सामवेदावि
धमधुपर्कविधिः अथाथर्ववेदेन मधुपर्कविधिः तत्रादौ यजमानो दर्भानानाय्य विष्टरान् कुर्वी
त अन्नं प्रतिवदेत् मम अनेन ताकर्मणा समस्यामीति मंत्रेणैकं पाद्यपाद्याय समेनतनाकर्मणा
समस्यामीतिद्विः पादे द्वितीयमासनार्थे तपसानाकर्मणा समस्यामि इति विष्टरं तृतीयं मधु
पर्कार्थमिति विष्टरत्रयं निर्माय यजमानहस्ते दद्यात् अनेन मंत्रेण ॐ अतिसृष्टो द्विषो समान्
देविषन्त्ववयेद्दिष्मास्य च रात्विति अनेन च द्वादशावृत्तिनिपठन् यजमान उपविशेत् अथ यज
मानः पाद्यार्थमुदकं गृहीत्वा ॐ अन्नपतिपाद्यमो इति निवेदयेत् अर्घ्यं घृतस्य सवसमाणमंत्रवततः
येनततरभिमंत्रयेत ॐ हिरण्यवर्णाः शुचयः पावकाः यासु जातः सविता यास्वग्निः याः अग्निं गर्भं द
धिरे सुवर्णास्ता न आपः शं स्योना भवन्तु १ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्ज
नानाम् याः अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु २ यासां देवा दिवि कृण्वन्ति भक्षं
या अन्तरिक्षे बहुधा भवन्ति याः अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ३ यासां देवा दि

© Dharmartha Trust J&K. Digitized by eGangotri

विक्रएंवतिमंत्रस्य श्राश्चनविते वहुधा भवंतिया॰ ओंगर्भेदधिरे स्तवर्णास्नानस्याप: शं स्योनाभवं
तु ५ शिवेन वत्त्वशापश्यताय: शिवयानत्वोपस्पृशत त्वचमे मृत्तन्तुनः श्रवयोया: पावकास्ता
नस्याप: शं स्योनाभवंतु ५ इति ततो॰ ओं गेमपिव्रलवनपश्चधारयाणीति मंत्रेणवामपादं प्रक्षा
ल्य ओं इमौपादावनिक्तौ ब्राह्मणोयशसावनाम् आप: पादावनेजनी द्विषंतं निर्दहंतु मे इ
ति पादावनेजनंमेत्र अस्य वदातुरितिपठन् दातारमीक्षते ततो यजमानः सविष्टवे भो इस्य ष्टौ।
यासनमाहारयति अर्च्य ओं विश्ववरो हघिवीमाबदामीहतमो भूमिं ब्राह्मणयावधाने ओं अ
श्रेष्ठे विश्रेती सममार्गी ह्नेनातिनिषीदमभूमे इति मंत्रेणमहि शाखा विष्टरासनेयमदः प्रत्ये
उपविशेत् ततएक शाखविष्टरपादे शति शापयेत् ओं युधिष्ठितो द्वेष्यो योस्मान्द्वेष्टि वयं च द्विष्मो॰
स्य वदातुरितिमंत्रेण अत्रास्य वदातुरिंपतेनमंत्रेण दातारमीक्षते ततो यजमानो॰ ओं पाद्यं ओं
धपुष्पादिसहितमुदकं गृहीत्वा॰ ओं भोः अर्घ्यं मावेदयेत् ततो अर्घ्यः ओं अन्नानां मुखमासि मुखं मे
हूंग्रेष्ठः समानानां भूयासं आपोह्नेतेस्या ह्नतमाकृ एउ घदाता: अस्माकं वहवो भवंतु अस्य बढ्राव
नमस्तु श्रेष्ठो भूर्भुवः स्वरोमितिमंत्रेणार्घ्यं गृहीत्वा भिममात्मा भिमुखेत् मीतिनीय ओं तेजोस
मजीयासंसास्सर्वमायुर्जीव्यासं स्युयजीव्यामे सर्वमायुर्जीव्यासं सर्वमायुर्जीव्यासमिदंजीवस्
यंजीवदेवा॰ जीव्यासमहं सर्वमायुर्जीव्यासमितिमंत्रेण त्रिवारपठितेन त्रिराचामेत् ततो यज

संजीवस्य संजीव्यासं सर्वमायुर्जीव्यासं जीवनास्य जीव्यासं

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र.
य.प.
५०
50

मानोमधुपर्कपात्रंकांस्यंदधिमधुघृतयुक्तंकांस्यपात्रेणपिहितंमधुस्थितद्विजाग्रेवोर्द्धंस्थितप्रागेवविष्टरमादा
यद्यान्तुवरोमधुपर्कोभोइतिवेदयेत् १ अर्घ्यंप्रयजमानस्थितमेवतमनुमंत्रयेदभिमंत्रैः ॐमधुवाताऋ
तायतेमधुक्षरंतिसिंधवः माध्वीर्गावोभवंतुनः १ मधुनक्तमथोषसोमधुमत्पार्थिवंरजः माधौर्नःसन्त्वो
षधीः २ मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः मधुद्यौरस्तुनःपिता ३ इतिप्रनरेभ्यएवप्रत्यभिमंत्रयेत् ततः
ॐतत्सूर्यमलावल्लपाशतीसंइतिमधुपर्कंपश्यतोऽस्य ॐअव्यतोहमस्यतोः आत्मायुतमेचक्षुरयुतमेश्रोत्रमधुतो
मेप्राणो युतोमेप्राणो युतोमेऽपानोयुतोमेव्यानोयुतोमेहंसर्वः ॐदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां।
पूष्णोहस्ताभ्यांप्रसूतःप्रशिषंविशति गृह्णामीतिहस्ताभ्यांप्रतिगृह्य प्रागंदंडस्थंडिलेनिधाय ॐपृथिव्यास्त्वाना
भौसादयाम्यदित्याःउपस्थेइतिमंत्रेणभूमौप्रतिष्ठाप्यांगुलिद्वयेनप्रदक्षिणंप्रचाल्यानामिकयांगुष्ठेनचस
कृत्ववसमाप्तणमंत्रैःप्राश्नीयात् ॐभूःतत्सवितुर्वरेण्यंभूःस्वाहेतिप्रथमं ॐभुवःभर्गोदेवस्यधीमहि ।
भुवःस्वाहेतिद्वितीयं ॐस्वःधियोयोनःप्रचोदयात् स्वःस्वाहेतितृतीयं ॐवर्गदेवस्यधीमहितत्स्वाहेति ।
चतुर्थं ४ ॐउरंदेवस्यभाजननहस्तत्स्वाहेति पंचमं ५ ॐकारस्वाहेतिषष्ठं ६ ॐउरुतत्स्वाहेतिसप्तमं ७ ॐम
हतत्स्वाहेतिअष्टमं ८ तत्स्वाहेतिनवमं ९ ॐशंस्वाहेतिदशमं १० ॐमिमेकादशी ११ ततस्तूष्णीमेकवारं।
इतिद्वादशप्राशाचम्योच्छिष्टंद्विजायप्रभायवादद्यात् ततःकर्त्तागौर्गौरितिनिवेदयेत् अध्यायः भूतमसि
भवदस्यतेप्राणोवद्भूर्भुवः ज्येष्ठयन्तमन्नामतः ॐभूर्भुवःस्वर्जनदोमित्युत्सृजति मीतर्दिमानाउदितावह

© Dharmartha Trust J&K. Digitized by eGangotri

नोयाणाः श्रद्धानाममस्तनस्यनाभिः हिरण्यवर्णो मधुकशा घृताची महान् गर्भश्चरति मर्त्येषु ओं स्तूयवस्मांगराव
तीहिभूया आथावयंभवनस्सामश्रहिरण्यमाशेविश्वदानीपिवश्रद्धमुदमावरेत्तौ इतिप्रतिष्ठामानामनु
मेम श्रस्यघजमानस्यममवमाश्याहतत्इतिब्रूयात् ततोदक्षिणादानंइमयर्थवेदिनोमधुपर्कविधिः इति।
वरणप्रयोगः ततः श्राचार्यप्रवतः कृत्वामंगलकलशंपटहीवास्वस्तिकसहितोमद्भंकर्णोभिरितिपठन् मंग
लतूर्यघोषवेदनिनदसहितोमंडपंप्रदक्षिणीकृत्वावामंडपंपश्चिमद्वारेणप्रविशेत् ततः श्राचार्यश्राव
स्याचणनायस्यदेशकालकीर्तनंकृत्वाश्रुककर्मांगत्वेनयजमानवृतोहमाचार्यकर्मकरिष्यामि इति।
संकल्प्यगौरसर्षपानादायपूर्वादिक्रमेणाविकिरेत्फटोन्नमंत्रेणयथा ओंरक्षोहणं १ पूर्वे ओंरक्षोहणोवो
दक्षिणे २ ओंरक्षोहांतिशीर्षिणी ३ पश्चिमे ओंरक्षोहाविश्वचर्षणी ४ उत्तरे श्रपसर्पंतुतेभूतायेभूताभु
विसंस्थिता येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया १ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः स्थानंत्यक्त्वा
यतत्सर्वंयत्रस्थंतत्रगच्छतु २ श्रपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं सर्वेषामवरोधेनब्रह्मकर्मसमार
भे ३ एतैः सर्वत्रसर्षपानिकिरेत् मंडपमध्ये ओंपवित्रवागीतिसूक्तेनमंत्रितसूत्रेणमंडपंवेष्टयेत् यदाव
धं इतिमंत्रेणषोडशंमेत्रसर्षपपोटलिकाबंधयेदितिविशेषः ततः कृणुष्वपाजइतिरक्षोघ्नसूक्तंपठेत्
इतिसर्षपविकिरणम् श्रथपंचगव्यप्रोक्षणप्रयोगः वारणपात्रमादायस्वर्णरतोधृत्वा ओंतत्स० या० इति
गायत्र्यागोमूत्रं ओंगंधद्वारेतिगोमयं ओंश्राप्यायस्वेतिक्षीरं ओंदधिक्राव्णइतिगव्यदधि ओंतेजोसिशु।

© Dharmartha Trust J&K. Digitized by eGangotri

श्रु॰
प॰ प॰
५१

51

कमसि गन्धमाजं देवस्य त्वेति कुशोदकं तस्मिन् क्षिपेत् यज्ञीयकाष्ठेन मेलयेत् ततः ॐ आपो हि ष्ठेमा इति
ऋभिर्ऋग्भिः पंचगव्येनाभ्युक्ष्य सर्वसंभारान्कर्मायतनं च प्रोक्ष्य सर्वस्मिन् इंद्रः पयः पृथिव्यां इति पठेत् इति मंड
पसंस्कारे वा स्तुवकस्पूजनं कर्तव्यं मंडपपवित्रीकालोक्षणमिति मंत्रेण दुग्धजलमिश्रधारादानमिति के।
वित् इति पंचगव्यकरणम् अथ मंडले सूर्यादिग्रहाणां स्थापनपूजनप्रयोगः तत्रादौ गणपतिमूर्तिस्था
पनम् पूर्वस्यां दिशि स्वस्तिकमध्ये कलशं परिकल्पयेत् प्रयोगः महीद्यौरिति भूप्रार्थना १ ओषधयः समिति।
तत्र यवप्रक्षेपः २ पूर्वे अग्निमीळे इति ऋग्वेदावाहनम् दक्षिणे इषे त्वा इति यजुर्वेदावाहनम् पश्चिमे अग्न
आयाहीति सामवेदावाहनम् उत्तरे शन्नो देवी इति अथर्ववेदावाहनम् ॐ स्थिरो भव वीड्विति तत्र गंध
लिप्तकलशनिधानम् ॐ आजिघ्र कलश इति कलशाभिमंत्रणं वरुणस्योत्तंभनमिति जलप्रक्षेपः ॐ गंध
द्वारामिति गंधप्रक्षेपः ४ ॐ या ओषधीरिति सर्वौषधी कुसीद कतर ८ मोझे ५ इति प्रमितिं ॐ ओषधयः समि
तिपवान् ७ धामन्नसीति धामम् ८ कांडात्कांडादिति दूर्वा ९ अश्वत्थे व इति पंचपल्लवान् १० स्योना पृथिवी।
ति सप्त मृदः ११ याः फलिनीरिति फलम् १२ परिवाजपतिरिति पंचरत्नानि १३ हिरण्यगर्भमिति हिरण्यं १४
युवा सुवासा इति वस्त्रेण मंगलसूत्रेण पूर्णा दर्वीति वेष्टयेत् १५ इमं मे वरुणेति पुनर्जलदानम् १६ पूर्णा
दर्वीति नारिकेलादियुतपात्रेण पिधानम् १७ तत्र गणपतिं स्थापयेत् एवं सूर्यादीनामावाहनं स्थापयेत्।
इंद्रादिलोकपालस्थापनकलशानां नानाद्रव्याणां वेलापिधानं तेषामधः सप्तधान्यप्रक्षेपणम् तत्र धामन्नसी।

५१

© Dharmartha Trust J&K. Digitized by eGangotri

तिमंत्र इति विशेषः ततो गणपत्यादिमूर्तीर्नाम अग्न्युत्तारणं कार्यम् इदं च सुवर्णादिधातुमूर्तीनामेव का-
र्यं न मृन्मयशिलाकाष्ठलेख्यादिकाले सर्वपूजने अथाग्न्युत्तारणप्रयोगः पंचगव्येन मूर्तिं संमार्ज्य जले
न संस्नाप्य स्वर्णगोमयेन ... हस्ताभ्यामभिमृश्य ... ततः संकल्पः ॐ मद्येत्यादि देशकालौ सं-
कीर्त्य ... कर्म संगतं ... अग्न्युत्तारण-
महं करिष्ये ततः प्रतिमां ... जपेत् कुशत्रयजलैर्वा मार्जयेत् ॐ समुद्रस्य त्वावकयाग्ने परिव्ययामा-
सि पावको अस्मभ्यं शिवो भव १ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि पावको अस्मभ्यं शिवो
भव २ उपज्मन्नुप वेतसेऽवतर नदीष्वा अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णं
शिवं कृधि ३ अपामिदं न्ययनं ... शिवो भव ४ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया आ देवान्वक्षि यक्षि च
स नः पावक दीदिवोऽग्ने देवाँ इहावह उप यज्ञ ५ हविश्च नः ६ पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच
उषसो न भानुना तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ७ नमस्ते हरसे शोचि-
षे नमस्ते अस्त्वर्चिषे अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ८ नृषदे वेडप्सुषदे
वेड्बर्हिषदे वेड्वनसदे वेट् स्वर्विदे वेट् ९ ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य १० ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मण
पुरएतारो अस्य येभ्यो न ऋते पवते धाम किंचन न ते दिवो न पृथिव्या अधि स्नुषु ११ प्राणदा अपानदा

२

© Dharmartha Trust J&K. Digitized by eGangotri

ग॰
प॰प॰
५२

52

यानदा वर्चोंवृविदेहाः अग्नेर्मास्ते॰ अस्मन्मयं तद्हेतयः पावको॰ अस्मभ्यं शिवा भव ११ इति गन्धनारणम् ततः
स्थापितकलशे गणपतिमूर्तिस्थापनम् तत्प्रयोगः आवाहनम् हेहेरंभ त्वमेह्येहि अंबिके अम्बिकात्मज॰ ग
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुःपितः १ नागास्यं नागहारं त्वां गणराजं चतुर्भुजं भूषितं स्वायुधैर्दिव्यैः प
रशुपाशैः २ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ३ ॐ गणानां त्वा॰
भगवन् गणपते सिद्धिबुद्धिसहित इहागच्छ अत्र प्रतिष्ठो वरदो भव मम पूजां गृहाण इति ततः आसनम् सिंहा
सने स्वर्णपीठं नानारत्नोपशोभितं अनेकशक्तिसंयुक्तमासनं प्रतिगृह्यतां १ ॐ चत्वरः स्वगक्ति इदमासन॰
नं शक्तिसहिताय महागणपतये नमः ततः स्थापनं ॐ स्थिरो भव वीड्वङ्गो इति ततः प्राणप्रतिष्ठा अस्य प्राण॰
सुकक्रमसोगतास्यिद्ध्यर्थमस्त्रकमूलैः प्राणप्रतिष्ठामहं करिष्ये इति संकल्प ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं स॰
हं हंसः अस्य गणपतिमूर्तेः प्राणा इह प्राणाः पुनः आं॰ जीव इह जीवः पुनः आं॰ सर्वेन्द्रियाणि वाङ्मनस्त्वक्
श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा पुनस्तस्योपरि पंचदशवारं
प्रणवं जपेत् अथ वैदिकप्राणप्रतिष्ठामन्त्राः ॐ अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री
वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्रा
णं गृह्णामि प्रजाभ्यः १ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वार
ं स्वारादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः २ ।

© Dharmartha Trust J&K. Digitized by eGangotri

अथपश्चाद्दिश्वव्यचाल्लस्यचत्वैर्वैश्वव्यचसेवर्षा स्वादित्योज्जगतीवार्षीजगामाः स्वकृमसख्क्तमा क्कुकः अ
क्रान्तमदश्शाः समदमाद्दे चूं पंजमदग्निर्ऋषिः प्रजापतिगृहीतयात्वयाचक्षुर्गृह्णामि प्रजाभ्यः १ १ इदमुत्त।
रात्तस्लस्यओवंशं सौवंशं शारद्भ्यो मनुष्टुप्शारं पलष्टुभः ॰ ये ॰ मेइशन्नमेषीमधितः एकविंशं शाहद्या
नेविश्वामित्र ऋषिः प्रजापतिगृहीतयात्वयाश्रोत्रं गृह्णामि प्रजाभिः ४ १ यमुपरिमतितिनसेवाङ् मामा।
हेमन्तोवायः पङ्क्तिर्हेमन्तीपङ्क्त्यै निधनवत्निधनवतः आग्रयणः आग्रयणात्त्रिणवत्रयस्त्रिंशं शोत्रिण।
वतस्त्रिंशंशाम्भ्योंशाकरैवतेविश्वकर्मऋषिः प्रजापतिगृहीतयात्वयावाचं गृह्णामि प्रजाभ्यो लोक
ताः १ द्वम ॐ मनोनुतिर्ज्यपता १ मनोनुतिर्ज्यपतामामस्येतिमनसावाः १ ८ ३ सर्वमाप्नत्नमनसैवेत।
त्सर्वमाप्नोति बृहस्पतिर्यत्तमिमंतन्नोत विष्ट्यज्ञं शं समिमं दधात्विति यद्विष्टं तत्संदधाति विश्वेदेवास इ
इहमाद्येनामिति सर्वं वै विश्वेदेवाः सर्वेणैवैतत्संदधाति स यद्कामयेत ब्रूयात्प्रतिष्ठेति एषवै प्रतिष्ठा २
इति प्राणा प्रतिष्ठा एवमेव सर्वमूर्तीनां कार्या पायसं पाटलोषधी रक्तपूरस्तरभिस्नातु श्रोतलं तोयमेतत्प्र
त्वसर्शेशिशिरं प्रतिगृह्यताम् एतावानस्य इं पाद्यं शाक्ति स ० अर्घ्यम् अर्घ्यं गृहाण देवेश गंधपुष्पाक्षतैः सह
श्रुणं दें शं त्वनो या के मयानव्यं निवेदितं ॐ त्रिपादूर्ध्वं इदमर्घ्यम् शाक्तिसहि ० आचमनीयं गंगादिसर्वती
र्थेभ्यो जलमेमयार्पितयाहृतं नदीनदसमुद्राणां स्नानार्थं प्रतिगृह्यताम् ॐ आपो हि ष्ठा मयोभुव इदं स्नानीयं
शाक्ति स ० अथ पंचामृतस्नानम् देवैस्त्वं वंदिता धेनु सर्वपापप्रणाशिनी तत्क्षीरस्नापितो देव नित्यमेव र

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र·
य·म·
५३

53

दोभव । ॐ पयः पृथिव्यां । इदं क्षीरस्नानम् आपोहिष्ठा । इदं शुद्धस्नानम् एवमग्रेपि दधिस्नानम् कामतो
कामतो वापि यन्मया दुष्कृतं कृतम् तत्सर्वं विलयं यातु दधिस्नानेन मोक्षद । ॐ दधिक्राव्णो । इदं दधिस्ना·
स्नानं घृतममृतं देवानां च सदाप्रियं तेन त्वं स्नापितो देव निधिकांत सदो भव । ॐ घृतं । इदं घृतस्नानं स·
मधुस्नानम् यस्य धारणमात्रेण त्रस्यन्ति यान्ति पितामहाः मधुना स्नापितो देव निःशोकहरो भव । ॐ मधुवाते
ति ऋत्वा मधुस्नानं स· शर्करास्नानम् यमलोकभयात् त्रस्तः शरणं त्वागतः प्रभो सितास्नानेन देवेश मां कुरुष्व
स्वपालितम् ॐ आप्यायस्व इदं शर्करास्नानं स· इति पंचामृतस्नानम् वस्त्रं सूक्ष्मतंतुमयं रम्यं कार्पासेन विनि
र्मितं मयोपपादितं तुभ्यं वाससी युग्मं प्रगृह्यताम् । ॐ परिधास्ये । इमे वाससी ॐ यशसा मा इन्द्रावरी
य इदं वस्त्रयुग्मम् यज्ञोपवीतम् नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतैः सह उपवीतं मया दत्तं गृहा
ण परमेश्वर ॐ यज्ञोपवीतम् इदं यज्ञोपवीतम् गन्धः श्रीखण्डचन्दनं दिव्यं गंधाढ्यं सुमनोहरम् विले·
पनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॐ गंधद्वारां । एष गंधः अक्षताः अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः
सुशोभनाः मया निवेदिताः भक्त्या गृहाण परमेश्वर ॥ ॐ अक्षन्नमीमदन्त । इमे अक्षताः पुष्पाणि के
तकीपंकजादीनि मालत्यादीनि वै प्रभो मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् । याः फलिनी ।
पुष्पाणि । धूपः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वनस्पतिरसोद्भिवो गंधाढ्यो गंधउत्तमः आघ्रेयः सर्वभूतानां धूपोयं प्रतिगृह्यताम् ॐ धूरसि· इदं धूपं दीपः
आज्यंचवर्तिसंयुक्तं पात्रेस्मिन्वह्नियोजितं भक्त्यातुभ्यंप्रयच्छामि देवाय परमात्मने ॐ अग्निर्ज्यो इदं दीपं नैवे
द्यम् शार्कराख्यानि खाद्यानि दधिक्षीरघृतानि च आहारं भक्तसंयुक्तं नैवेद्यं गृह्यताम्भो ॐ अन्नपते इदं नैवे·
द्यम् पूगीफलं पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं कर्पूरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम् ॐ वनस्प
तीवीड्वङ्गो इदं ताम्बूलम् दक्षिणा हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनन्तपुण्यफलदमतः शान्ति
प्रयच्छ मे ॐ हिरण्यगर्भस्य इमां दक्षिणाम् जपः सुमुखश्चैकेति स्तोत्रपाठश्च सुमुखश्चैकदन्तश्च कपिलो ग
जकर्णकः लंबोदरश्च विकटो विघ्ननाशो विनायकः धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः द्वादशैतानि·
नामानि यः पठेच्छृणुयादपि विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते इति
आरात्रिकम् श्रुद्धश्रुत्वा वरावर्तिराज्येन च समम्बिना आरार्तिकप्रदानेन सुप्रीतो वरदो भव । ॐ आरात्रिया·
इदमारात्रिकम् प्रदक्षिणा यानि कानि च पापानि बहुजन्मकृतानि च तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे
ॐ गणिपदानिवि इमां प्रदक्षिणां नमस्कारः नागयज्ञोपवीतांगं नानाराभोपशोभितम् त्रैलोक्यविघ्नहर्तारं वं
त्वां नूतनमाम्यहम् ॐ नमो गणेभ्यो इमं नमस्कारम् पुष्पांजलिः पुष्पांजलिमिमं देव नानापुष्पमनोहरं प्र
सीदानेन देवेश अवशो भव गणेश्वर ॐ गणानान्त्वा· इदं पुष्पांजलिम् फलम् इदं फलं मया देव स्थापितं पुर
तस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि । ॐ याः फलिनी· इदं फलम् विशेषार्घ्यं रक्तवस्त्रगणाध्यक्ष·

© Dharmartha Trust J&K. Digitized by eGangotri

गृ०
य०प०
५८

54

सर्वैलोकारक्षक भक्तानामभयंकर्त त्रायस्व भवसागरात् १ हेमाब्जकर्णपाशिधोषाणमोनरायग्नायग्न वर
रत्नवरं देहि वांछितं वांछितार्थद २ गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत अनेनार्घ्यप्रदानेन प्रीतो भव गणा
धिप ३ ततः प्रार्थना विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय नागाननाय श्रु
तिसर्ग्यविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते १ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वरा
य शुभदाय सुरेश्वराय विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते २ नमस्ते ब्र
ह्मरूपाय विष्णुरूपाय ते नमः नमस्ते रुद्ररूपाय करिरूपाय ते नमः विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ४ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर यत्पूजितं मया देव परिपू
र्णं तदस्तु मे ५ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा इति गणपति
पूजा ततः ॐ उ स्थंडिलस्य ईशाने कलशस्थापयेत् अयमेव रुद्रकलशः शांतिकादावभिषेकार्थम्।
अथ विवाहादिस्थलकर्मसु न भवति सूर्याभावात् तत्स्थाने: सूर्याकोतेयः तदुपरि वरुणं पूजयेत् ततो या
म् ततोऽग्निस्थापनम् तत्र ॐ उ स्थंडलयोः पश्चिमपार्श्वस्थितेन कार्यम् अथ पंचभूसंस्काराः परिसमूह्य त्रिभिर्दर्भैस्त्रि
वार हस्तमितं स्थंडिले प्राक्संस्थमुदक्संस्थं वा परिसमूह्य तान् कुशानैशान्यां वा निरस्य प्रागग्रं त्रिरुल्लेखाः स्थंडि
ले तात्रेखोल्लिख्योल्लेखनक्रमेण हस्तयोरंगुष्ठानामिकाभ्यां सर्वं यथानिरस्य मृद्धं हस्ते ततजलेनाभ्युक्ष्य नवीनकांस्येन नूश
रावेण वाग्निं स्वयं समानीय निर्धानतूष्णीं विनियोजयेत् ततो गृहस्थापने अथ मंत्राणां स्थापनादय उच्यन्ते।

५८

ह स्तः सूर्यं तोयपरिमज्य गोमयोदकेन विवारमुपलिप्य मृत्स्नेन च ५१

© Dharmartha Trust J&K. Digitized by eGangotri

अथ शीघ्रसिद्ध्यर्थं आगमोक्तप्रकारः वैदिकप्रयोगे विनियोगमात्रं भवति न्यासादिकं कात्यायनस्मरणात् मा
महीनो भवेन् मूको विकलो निष्फलो जपः तस्मान्न्यासं विधाय दोषप्रशान्तये दीयते जपः इत्युक्तेर्नवग्रहाणां न्यास
उच्यते ऋषिमादौ नियुञ्जीत छन्दो मध्ये नियोजयेत् देवतां च वृषणे च मंत्री मंत्रप्रसिद्धये ऋषयः शिरसि न्य
सा छन्दांसि मुखे मध्यतः देवता हृदये न्यसेत् जपे होमे स्वाध्याये अविदित्वा श्रुतिं छन्दो दैवतं विनियोजनम्
योजयेज्जपेज्जुहुयाद्वापि सर्वं तन्निष्फलं भवेत् इति तत्र आकृष्णेनेति हिरण्यस्तूपः ऋषिः सविता त्रिष्टुप् आवाहने स्था
पने जपे होमे वा विनियोगः ॐ आकृष्णेन अंगुष्ठाभ्यां· रजसा तर्जनीभ्यां· वर्तमानो निवेशयन् मध्यमाभ्यां·
अमृतं मर्त्यं च अनामिकाभ्यां· हिरण्ययेन सविता रथेन कनिष्ठिकाभ्यां· आदेवो याति भुवनानि पश्यन् क
रतलकरपृष्ठाभ्यां· आकृष्णेन हृदयाय नमः रजसा शिरसे स्वाहा वर्तमानो निवेशयन् शिखायै वौषट्
अमृतं मर्त्यं च कवचाय हुम् हिरण्ययेन सविता रथेन नेत्रत्रयाय वौषट् आदेवो याति भुवनानि पश्यन् अ
